| रागः | पृष्ठं |
|---|---|
| शुद्धवराटी | १४५ |
| शुद्धवराटिका | १४२ |
| शुद्धा | १२०।१२६ |
| श्यामनाटः | १७८ |
| श्रीः | १६६ |
| श्रीकंठी | १२१।१६९ |
| **ष** | |
| षड्जभाषा | १२० |
| षड्जमध्यमः | १५७ |
| षाडवः | १३० |
| **स** | |
| साधारिता | १४२ |
| सामंतः | १७१ |
| सारंगः | १७० |
| सालंगनाटः | १८० |
| सावेरी | १५१ |
| सिंहरवः | १८२ |
| सिंहलीकामोदा | ११७ |

| रागः | पृष्ठं |
|---|---|
| सुरालयः | १२९ |
| सुहवी | १५४ |
| सैंधवीवराटी | १४५ |
| सोमरागः | १७० |
| सौदामिनी | १८२ |
| सौराष्ट्रगुर्जरी | १२४ |
| सौराष्ट्री | १३३।१६२ |
| सौवीरः | १४१ |
| सौवीरजागांधारी | १४१ |
| सौवीरी | १४१ |
| स्वर्णाकर्षणभैरवः | ११६ |
| स्वरवल्लिका | ११९ |
| **ह** | |
| हतस्वरावराटी | १४५ |
| हंमीरः | १७७ |
| सः | १८३ |
| हिजेजः | ११५ |
| हिंदोलः | १५६ |


॥ श्रीः ॥

संगीतराजभावभट्टविरचितः

# अनूपसंगीतरत्नाकरः ।

अयं ग्रंथः

पुण्यपत्तनस्थपंडितदत्तात्रेयकेशवजोशीत्यभिधेन यथामति संशोधितः ।

स च

## भालचन्द्रशर्मणा

आर्यभूषणाख्यमुद्रालये मुद्राक्षैरंकयित्वा प्राकाश्यं नीतः ।

शकः १८४१ सन १९१९

( सर्वेऽधिकाराः स्वायत्तीकृताः )

# अनूपसंगीतरत्नाकरग्रंथस्य वस्तुसंग्रहः ।


| | पृष्ठांकः |
|---|---|
| **स्वराध्यायः ।** | |
| मंगलाचरणम् ... ... ... | १ |
| मार्गगानम् ... ... ... | १ |
| देशीगानम् ... ... ... | १ |
| गानप्रशस्तिः ... ... ... | २ |
| संगीतविशारदनामानि ... ... | २ |
| नादः ... ... ... ... | ३ |
| श्रुतयः ... ... ... ... | ३ |
| स्वराः ... ... ... ... | ५ |
| ग्रामाः ... ... ... ... | ७ |
| मूर्छनाः ... ... ... | ८ |
| शुद्धतानाः ... ... ... | ९ |
| कूटतानाः ... ... ... | १० |
| प्रस्तारः... ... ... ... | १२ |
| खंडमेरुः... ... ... ... | १२ |
| उद्दिष्टम्... ..... ... ... | १३ |
| नष्टम् ... ... ... ... | १३ |
| वर्णाः ... ... ... ... | १३ |
| अलंकाराः ... ... ... | १३ |
| आलापलक्षणम्... ... ... | १४ |
| आलप्तिलक्षणम् ... ... | १४ |
| ध्रौपदलक्षणम् ... ... ... | १५ |
| काडलक्षणम् ... ... ... | १५ |
| **रागाध्यायः** | |
| नाटभेदाः ... ... ... | १८ |
| कर्णाटभेदाः ... ... ... | १९ |
| कल्याणभेदाः ... ... ... | १९ |
| वेलावलीभेदाः ... ... ... | १९ |
| तोडीभेदाः ... ... .... | २० |
| गौरीभेदाः ... ... ... | २० |
| गौडभेदाः ... ... ... | २० |
| वराटीभेदाः ... ... ... | २१ |
| पूरियाभेदाः ... ... ... | २१ |
| आसावरीभेदाः ... ... ... | २१ |
| केदारभेदाः ... ... ... | २१ |
| विहंगडभेदो ... ... ... | २१ |
| सारंगभेदाः ... ... ... | २२ |
| भैरवभेदाः ... ... ... | २२ |
| कामोदभेदाः ... ... ... | २२ |
| गुर्जरीभेदा ... ... ... | २२ |
| सैंधवीभेदाः ... ... ... | २२ |
| मल्हारभेदाः ... ... ... | २३ |
| ग्रामरागाः ... ... ... | २३ |
| पूर्वप्रसिद्धरागाः ... ... ... | २६ |
| पारिजातोक्तरागाः ... ... | २६ |
| रागरागिणीप्रपंचः... ... ... | २८ |
| मेलाः ... ... ... ... | ३१ |
| तोडीमेलः... ... ... ... | ३२ |
| गौडीमेलः... .... ... ... | ३३ |
| वराटीमेलः ... ... ... | ३३ |
| केदारमेलः ... ... ... | ३४ |
| शुद्धनाटमेलः ... ... ... | ३४ |
| मालवकैशिकमेलः ... ... | ३४ |
| श्रीरागमेलः ... ... ... | ३४ |
| हंमीरमेलः ... ... ... | ३४ |
| आहेरीमेलः ... ... ... | ३५ |
| कल्याणमेलः ... ... ... | ३५ |
| देशाक्षीमेलः ... ... ... | ३५ |

| | पृष्ठांकः |
|---|---|
| देशीकारमेलः ... ... ... | ३५ |
| सारंगमेलः ... ... ... | ३५ |
| कर्णाटमेलः ... ... ... | ३६ |
| कामोद्मेलः ... ... ... | ३६ |
| हिजेजमेलः ... ... ... | ३६ |
| नाद्रामक्रीमेलः... ... ... | ३६ |
| हिंदोलमेलः ... ... ... | ३६ |
| मुखारीमेलः ... ... ... | ३७ |
| सोममेलः ... ... ... | ३७ |
| पारसीकरागाः ... ... ... | ३७ |
| श्रीरागः... ... ... ... | ३८ |
| मालवी ... ... ... ... | ३८ |
| त्रावणी... ... ... ... | ३९ |
| गौरी ... ... ... ... | ४० |
| केदारः.... ... ... ... | ४० |
| मधुमाधवी ... ... ... | ४२ |
| पहाडी ... ... ... ... | ४२ |
| वसंतः ... ... ... ... | ४२ |
| देशी ... ... ... ... | ४३ |
| देवगिरी... ... ... ... | ४३ |
| वराटी ... ... ... ... | ४४ |
| तोडीवराडी ... ... ... | ४३ |
| नागवराटी ... ... ... | ४४ |
| पुन्नागवराटी ... ... ... | ४४ |
| प्रतापवराटी ... ... ... | ४४ |
| कल्याणवराटी ... ... ... | ४४ |
| तोडी ... ... ... ... | ४५ |
| ललितः... ... ... ... | ४५ |
| हिंदोलः ... ... ... ... | ४६ |
| भैरवः ... ... ... ... | ४७ |
| भैरवी ... ... ... ... | ४७ |
| गर्जरी ... ... ... ... | ४८ |
| वेग। ... ... ... ... | ४९ |

| | पृष्ठांकः |
|---|---|
| गुणक्री ... ... ... ... | ४९ |
| चंगाली ... ... ... ... | ५० |
| चहुली ... ... ... ... | ५० |
| शुद्धपंचमः ... ... ... | ५१ |
| विभासः... ... ... ... | ५१ |
| भूपाली ... ... ... ... | ५२ |
| कानरः ... ... ... ... | ५३ |
| वडहंसः ... ... ... ... | ५५ |
| मालवश्रीः ... ... ... | ५५ |
| पटमंजरी ... ... ... | ५६ |
| मेवः ... ... ... ... | ५७ |
| मल्लारः... ... ... ... | ५७ |
| सौराष्ट्री ... ... ... ... | ५८ |
| सावेरी ... ... ... ... | ५८ |
| मालवकौशिकः ... ... ... | ५८ |
| देवगांधारः ... ... ... | ५९ |
| शंकराभरणः ... ... ... | ६० |
| नट्टनारायणः ... ... ... | ६० |
| कामोदी ... ... ... | ६१ |
| कल्याणः ... ... ... | ६२ |
| शुद्धनाटः ... ... ... | ६३ |
| सारंगः ... ... ... ... | ६४ |
| हंमीरः ... ... ... ... | ६५ |
| दीपकः ... ... ... ... | ६६ |
| वर्णनाटः ... ... ... | ६६ |
| टक्कः ... ... ... ... | ६६ |
| सैंधवी ... ... ... ... | ६७ |
| द्वितीयसैंधवी ... ... ... | ६७ |
| तृतीयसैंधवी ... ... ... | ६७ |
| चतुर्थसैंधवी ... ... ... | ६७ |
| पंचसैंधवी ... ... ... | ६८ |
| षष्ठसैंधवी ... ... ... | ६८ |
| मध्यमादिः ... ... ... | ६८ |





| | पृष्ठांकः |
|---|---|
| संबावती ... ... ... ... | ६८ |
| ककुभः ... ... ... ... | ६९ |
| धन्नाश्रीः ... ... ... ... | ७० |
| आसावरी ... ... ... | ७१ |
| रामक्री ... ... ... ... | ७१ |
| देशाख्या ... ... ... | ७२ |
| अडानः ... ... ... ... | ७३ |
| वेलावली ... ... ... | ७३ |
| छायानाटः ... ... ... | ७४ |
| गौडसारंगः ... ... ... | ७५ |
| षड्रागः ... ... ... | ७५ |

| | पृष्ठांकः |
|---|---|
| सुहवी ... ... ... ... | ७५ |
| जेतश्रीः ... ... ... | ७५ |
| श्यामः ... ... ... ... | ७६ |
| सामंतः ... ... ... ... | ७६ |
| देशिकारः ... ... ... | ७६ |
| इमनः ... ... ... ... | ७७ |
| कुडाई ... ... ... ... | ७७ |
| सुरालयः ... ... ... | ७७ |
| अर्जुनः ... ... ... ... | ७७ |
| कोकिलः ... ... ... | ७८ |

॥ श्रीः ॥

# अनूपसंगीतरत्नाकरः ।

## अथ स्वराध्यायः ।

मङ्गलाचरणम् ।

श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

ब्रह्मग्रन्थिजमारुतानुगतिना चित्तेन हृत्पङ्कजे ।
सूरीणामनुरंजकः श्रुतिपदं योऽयं स्वयं राजते ॥
यस्माद्ग्रामविभागवर्णरचनालंकारजातिक्रमो ।
बन्दे नादतनुं तमुद्धुरजगद्गीतं मुदे शंकरम् ॥ १ ॥

---

धारयन्मनसा वायुं व्याहरन्प्रणवाक्षरम् ।
आसनेऽनन्यधीरास्ते रहस्ये विजितेन्द्रियः ॥ २ ॥
संप्राप्ते मारुते तस्मिन्सुषुम्नायां वरानने ।
मन्त्रमुच्चार्य मनसा हृन्मध्ये धारयेत्सुधीः ॥ ३ ॥
वायुना पूरिते व्योम्नि साङ्गोपाङ्गकलेवरे ।
तदात्मा राजते तत्र यथा व्योम्नि विकर्तनः ॥ ४ ॥
तौर्यत्रिकं तु संगीतं संगीती तज्ज्ञ उच्यते ।
मार्गो देशीति तद्द्वेधा तत्र मार्गः स उच्यते ॥ ५ ॥
यो मार्गितो विरिञ्चाद्यैः प्रयुक्तो भरतादिभिः ।
देवस्य पुरतः शंभोर्नियताभ्युदयप्रदः ॥ ६ ॥
देशे देशे जनानां यद्रुच्या हृदयरञ्जकम् ।
गानं च वादनं नृत्यं तद्देशीत्यभिधीयते ॥ ७ ॥
नृत्यं वाद्यानुगं प्रोक्तं वाद्यं गीतानुवृत्ति च ।
अतो गीतं प्रधानत्वादत्राऽऽदावभिधीयते ॥ ८ ॥

सामवेदादिदं गीतं संजग्राह पितामहः ।
गीतेन प्रीयते देवः सर्वज्ञः पार्वतीपतिः ॥ ९ ॥
गोपीपतिरनन्तोऽपि वंशध्वनिवशंगतः ।
सामगीतिरतो ब्रह्मा वीणासक्ता सरस्वती ॥ १० ॥
किमन्ये यक्षगन्धर्वदेवदानवमानवाः ।
अज्ञातविषयास्वादो बालः पर्यङ्किकागतः ॥ ११ ॥
रुदन्गीतामृतं पीत्वा हर्षोत्कर्षं प्रपद्यते ।
वनेचरस्तृणाहारश्चित्रं मृगशिशुः पशुः ॥ १२ ॥
लुब्धो लुब्धकसंगीते गीते त्यजति जीवितम् ॥
तस्य गीतस्य माहात्म्यं कः प्रशंसितुमीशते ।
धर्मार्थकाममोक्षाणामिदमेवैकसाधनम् ॥ १३ ॥
वीणावादनतत्वज्ञः श्रुतिजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं च गच्छति ॥ १४ ॥
सदाशिवः शिवो ब्रह्मा भरतः कश्यपो मुनिः ।
मतङ्गो याष्टिको दुर्गाशक्तिः शार्दूलकोहलौ ॥ १५ ॥
विशाखिलो दन्तिलश्च कम्बलोऽश्वतरस्तथा ।
वायुर्विश्वावसू रम्भार्जुननारदतुम्बराः ॥ १६ ॥
आञ्जनेयो मातृगुप्तो रावणो नन्दिकेश्वरः ।
स्वातिर्गणो बिन्दुराजः क्षेत्रराजश्च राहलः ॥ १७ ॥
रुद्रटो नान्यभूपालो भोजभूवल्लभस्तथा ।
परमर्दी च सोमेशो जगदेकमहीपतिः ॥ १८ ॥
व्याख्यातारो भारतीये लोल्लटोद्भटशङ्कुकाः ।
भट्टाभिनवगुप्तश्च श्रीमत्कीर्तिधरोऽपरः ॥ १९ ॥
अन्ये च बहवः पूर्वे ये संगीतविशारदाः ।
अगाधबोधमन्थेन तेषां मतपयोनिधिम् ॥
निर्मथ्यानृपसिंहोऽयं सारोद्धारमिमं व्यधात् ॥ २० ॥

---



## अथ नादः ।

चैतन्यं सर्वभूतानां विवृतं जगदात्मना ।
नादब्रह्म तदानन्दमद्वितीयमुपास्महे ॥ २१ ॥
अतो गीतप्रपञ्चस्य श्रुत्या देहत्वदर्शनात् ।
अपि स्यात्सच्चिदानन्दरूपिणः परमात्मनः ॥
प्राप्तिः प्रभाप्रवृत्तस्य मणिलाभो यथा भवेत् ॥ २२ ॥
नादोपासनया देवा ब्रह्मविष्णुमहेश्वराः ।
भवन्त्युपासिता नूनं यस्मादेते तदात्मकाः ॥२३ ॥
आत्मा विवक्षमाणोऽयं मनः प्रेरयते मनः ।
देहस्थं वह्निमाहन्ति स प्रेरयति मारुतम् ॥ २४ ॥
ब्रह्मग्रन्थिस्थितः सोऽथ क्रमादूर्ध्वपथे चरन् ।
नाभिहृत्कण्ठमूर्धास्येष्वाविर्भावयति ध्वनिम् ॥ २५ ॥
नादोऽतिसूक्ष्मः सूक्ष्मश्च पुष्टोऽपुष्टश्च कृत्रिमः ।
इति पञ्चाभिधां धत्ते पञ्चस्थानस्थितः क्रमात् ॥ २६ ॥
नकारं प्राणनामानं दकारमनलं विदुः ।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते ॥ २७ ॥
परा श्रीशांभवे ज्ञाने वानस्पत्ये तु मध्यमा ।
सर्वजंतुषु पश्यन्ती वैखरी ज्ञानयोगिषु ॥ २८ ॥
व्यवहारे त्वसौ त्रेधा हृदि मन्द्रोऽभिधीयते ।
कण्ठे मध्यो मूर्ध्नि तारो द्विगुणश्चोत्तरोत्तरः ॥ २९ ॥
तस्य द्वाविंशतिर्भेदाः श्रवणाच्छ्रुतयो मताः ।
हृद्यूर्ध्वनाडीसंलग्ना नाड्यो द्वाविंशतिर्मताः ॥ ३० ॥

---

## अथ श्रुतयः ।

तिरश्च्यस्तास्तु तावत्यः श्रुतयो मारुताहताः ।
उच्चोच्चतरतायुक्ताः प्रभवन्त्युत्तरोत्तरम् ॥

एवं कण्ठे तथा शीर्षे श्रुतिर्द्वाविंशतिर्मता ॥ ३१ ॥
श्रवणार्थस्य धातोः क्तिप्रत्यये च सुसंश्रिते ।
श्रुतिशब्दः प्रसाध्योऽयं शब्दज्ञैः कर्मसाधनैः ॥ ३२ ॥
श्रवणेन्द्रियग्राह्यत्वाद्ध्वनिरेव श्रुतिर्भवेत् ।
सा चैका द्विविधा ज्ञेया स्वरान्तरविभागतः ॥ ३३ ॥
नियतश्रुतिसंस्थानाद्गीयते सप्तगीतिषु ।
तस्मात्स्वरगता ज्ञेयाः श्रुतयः श्रुतिवेदिभिः ॥ ३४ ॥
अन्तरस्वरवर्तिन्यो ह्यन्तरश्रुतयो मताः ।
एतासामपि वैस्वर्यं क्रियाक्रमविभागतः ॥ ३५ ॥
उच्चैस्तरो ध्वनी रूक्षो विज्ञेयो वातजो बुधैः ।
गम्भीरो घनलीनस्तु ज्ञेयोऽसौ पित्तजो बुधैः ॥ ३६ ॥
स्निग्धश्च सुकुमारश्च मधुरः कफजो ध्वनिः ।
त्रयाणां गुणसंयुक्तो विज्ञेयः सन्निपातजः ॥ ३७ ॥
द्विश्रुतिस्त्रिश्रुतिश्चैव चतुःश्रुतिक एव च ।
स्वरप्रयोगः कर्तव्यो वंशच्छिद्रगतो बुधैः ॥ ३८ ॥
द्विकत्रिकचतुष्कास्तु ज्ञेया वंशगताः स्वराः ।
कम्पमानार्धमुक्ताश्च व्यक्तमुक्ताङ्गुलिस्वराः ॥ ३९ ॥
इति तावन्मया प्रोक्ताः समीच्यः श्रुतयो नव ॥

द्वाविंशतिं केचिदुदाहरन्ति
श्रुतीः श्रुतिज्ञानविचारदक्षाः ।
षट्षष्टिभिन्नाः खलु केचिदासा-
मानन्त्यमेव प्रतिपादयन्ति ॥ ४० ॥

आनन्त्यं हि श्रुतीनां च सूचयन्ति विपश्चितः ।
यथा ध्वनिविशेषाणाममानं गगनोदरे ॥ ४१ ॥
उत्तालपवनोद्वेल्लज्जलराशिसमुद्भवाः ।
इयत्यः प्रतिपद्यन्ते न तरङ्गपरम्पराः ॥ ४२ ॥

———



## अथ स्वराः ।

श्रुतिभ्यः स्युः स्वराः षड्जर्षभगान्धारमध्यमाः ।
पञ्चमो धैवतश्चाथ निषाद इति सप्त ते ॥ ४३ ॥
षण्णां स्वराणां जनकः षड्भिर्वा जन्यते स्वरैः ।
षड्भ्यो वा जायतेऽङ्गेभ्यः षड्ज इत्यभिधीयते ॥ ४४ ॥
प्राप्नोति हृदयं शीघ्रमन्यस्मादृषभः स्मृतः ।
गोगवीषु यथा तिष्ठन्विभाति ऋषभो महान् ॥ ४५ ॥
स्वरग्रामे समुत्पन्नः स्वरोऽयमृषभस्तथा ।
वाचं गानात्मिकां धत्त इति गान्धारसंज्ञकः ॥ ४६ ॥
स्वराणां मध्यमत्वाच्च मध्यमः स्वर उच्यते ।
स्वरान्तराणां विस्तारं यो मिमीते स पञ्चमः ॥ ४७ ॥
पाठक्रमेण गणने संख्यया पञ्चमोऽथवा ।
धीर्यस्यास्ति स धीवांस्तत्संबन्धी धैवतः स्मृतः ।
षष्ठस्थाने धृतो यस्मात्ततोऽसौ धैवतो मतः ॥ ४८ ॥
निषीदन्ति स्वराः सर्वे निषादस्तेन कथ्यते ॥
तेषां संज्ञाः सरिगमपधनीत्यपरा मताः ॥ ४९ ॥
श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणनात्मकः ।
स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यते ॥ ५० ॥
ननु श्रुतिश्चतुर्थ्यादिरस्त्वेवं स्वरकारणम् ।
त्र्यादीनां तत्र पूर्वासां श्रुतीनां हेतुता कथम् ॥ ५१ ॥
ब्रूमस्तुर्यां तृतीयादिः श्रुतिः पूर्वाभिकाङ्क्षया ।
निर्धार्यतेऽतः श्रुतयः पूर्वा अप्यत्र हेतवः ॥ ५२ ॥
दीप्ताऽऽयता च करुणा मृदुर्मध्येति जातयः ।
श्रुतीनां पञ्च तासां च स्वरेष्वेवं व्यवस्थितिः ॥ ५३ ॥
दीप्ताऽऽयता मृदुर्मध्या षड्जे स्यादृषभे पुनः ।
संस्थिता करुणा मध्या मृदुर्गान्धारके पुनः ॥ ५४ ॥

दीप्तायते मध्यमे ते मृदुर्मध्ये च संस्थिते ।
मृदुर्मध्याऽऽयताख्या च करुणा पञ्चमे स्थिता ॥ ५५ ॥
करुणा चाऽऽयता मध्या धैवते सप्तमे पुनः ।
दीप्ता मध्येति तासां च जातीनां ब्रूमहे भिदाः ॥ ५६ ॥
तीव्रा रौद्री वज्रिकोग्रेत्युक्ता दीप्ता चतुर्विधा ।
कुमुद्वत्यायता या स्यात्क्रोधा चाथ प्रसारिणी ॥ ५७ ॥
संदीपिनी रोहिणी च भेदाः पञ्चेति कीर्तिताः ।
दयावती तथाऽऽलापिन्यथ प्रोक्ता मदन्तिका ॥ ५८ ॥
त्रयस्ते करुणाभेदा मृदोर्भेदचतुष्टयम् ।
मन्दा च रतिका प्रीतिः क्षमेति मध्या तु षड्भिदा ॥ ५९ ॥
छन्दोवती रञ्जनी च मार्जनी रक्तिका तथा ।
रम्या च क्षोभिणीत्यासामथ ब्रूमः स्वरस्थितिम् ॥ ६० ॥
तीव्राकुमुद्वतीमन्दाछन्दोवत्यस्तु षड्जगाः ।
दयावती रञ्जनी च रक्तिका चर्षभे स्थिताः ॥ ६१ ॥
रौद्री क्रोधा च गान्धारे वज्रिकाऽथ प्रसारिणी ।
प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः ॥ ६२ ॥
क्षिती रक्ता च संदीपिन्यालापिन्यपि पञ्चमे ।
मदन्ती रोहिणी रम्येत्येतास्तिस्रस्तु धैवते ॥ ६३ ॥
उग्रा च क्षोभिणीति द्वे निषादे वसतः श्रुती ।
ते मन्द्रमध्यताराख्यस्थानभेदात्त्रिधा मताः ॥ ६४ ॥
त एव विकृतावस्था द्वादश प्रतिपादिताः ॥
च्युतोऽच्युतो द्विधा षड्जो द्विश्रुतिर्विकृतो भवेत् ।
साधारणे काकलीत्वे निषादस्य च दृश्यते ॥ ६५ ॥
साधारणे श्रुतिं षाड्जीमृषभः संश्रितो यदा ।
चतुःश्रुतित्वमायाति तदैको विकृतो भवेत् ॥ ६६ ॥
साधारणे त्रिश्रुतिः स्यादन्तरत्वे चतुःश्रुतिः ।
गान्धार इति तद्भेदौ द्वौ निःशङ्केन कीर्तितौ ॥ ६७ ॥



मध्यमः षड्जवद्द्वेधाऽन्तरसाधारणाश्रयात् ।
पञ्चमो मध्यमग्रामे त्रिश्रुतिः कैशिके पुनः ॥ ६८ ॥
मध्यमस्य श्रुतिं प्राप्य चतुश्श्रुतिरिति द्विधा ।
धैवतो मध्यमग्रामे विकृतः स्याच्चतुःश्रुतिः ॥ ६९ ॥
कैशिके काकलीत्वे च निषादस्त्रिचतुःश्रुतिः ।
प्राप्नोति विकृतौ भेदौ द्वाविति द्वादश स्मृताः ।
तैः शुद्धैः सप्तभिः सार्धं भवन्त्येकोनविंशतिः ॥ ७० ॥
मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ।
गजश्च सप्त षड्जादीन्क्रमादुच्चारयन्त्यमी ॥ ७१ ॥
चतुर्विधाः स्वरा वादी संवादी च विवाद्यपि ।
अनुवादी च वादी तु प्रयोगे बहुलः स्वरः ॥ ७२ ॥
श्रुतयो द्वादशाष्टौ वा ययोरन्तरगोचराः ।
मिथः संवादिनौ तौ स्तो निगावन्यविवादिनौ ॥ ७३ ॥
रिधयोरेव वा स्यातां तौ तयोर्वा रिधावपि ।
शेषाणामनुवादित्वं वादी राजाऽऽत्र गीयते ॥ ७४ ॥
संवादी त्वनुसारित्वादस्यामात्योऽभिधीयते ।
विवादी विपरीतत्वाद्धीरैरुक्तो रिपूपमः ॥ ७५ ॥
नृपामात्यानुसारित्वादनुवादी तु भृत्यवत् ।

---

## अथ ग्रामाः ।

ग्रामः स्वरसमूहः स्यान्मूर्छनादेः समाश्रयः ।
तौ द्वौ धरातले तत्र स्यात्षड्जग्राम आदिमः ॥ ७६ ॥
द्वितीयो मध्यमग्रामस्तयोर्लक्षणमुच्यते ।
षड्जग्रामः पञ्चमे स्वचतुर्थश्रुतिसंस्थिते ॥ ७७ ॥
स्वोपान्त्यश्रुतिसंस्थेऽस्मिन्मध्यमग्राम इष्यते ॥
यद्वा धस्त्रिश्रुतिः षड्जे मध्यमे तु चतुःश्रुतिः ।
रिमयोः श्रुतिमेकैकां गान्धारश्चेत्समाश्रितः ॥ ७८ ॥

पश्रुतिं धो निषादस्तु धश्रुतिं सश्रुतिं श्रि  ।
गान्धारग्राममाचष्टे तदा तं नारदो मुनिः ॥ ७९ ॥
प्रवर्तते स्वर्गलोके ग्रामोऽसौ न महीतले ।
षड्जः प्रधान आद्यत्वादमात्याधिक्यतस्तथा ॥ ८० ॥
ग्रामे स्यादविलोपित्वान्मध्यमस्तु पुरःसरः ।
एतत्कुलप्रसूतत्वाद्गान्धारोऽप्यग्रणीर्दिवि ॥ ८१ ॥

---

### अथ मूर्छनाः ।

क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् ।
मूर्छनेत्युच्यते ग्रामद्वये ताः सप्त सप्त च ॥ ८२ ॥
षड्जे तूत्तरमन्द्राऽऽदौ रजनी चोत्तरायता ।
शुद्धषड्जा मत्सरीकृदश्वक्रान्ताऽभिरुद्गता ॥ ८३ ॥
मध्यमे स्यात्तु सौवीरी हारिणाश्वा ततःपरम् ।
स्यात्कलोपनता शुद्धमध्या मार्गी च पौरवी ॥ ८४ ॥
हृष्यकेत्यथ तासां तु लक्षणं प्रतिपाद्यते ।
मध्यस्थानस्थषड्जेन मूर्छनाऽऽरभ्यतेऽग्रिमा ॥ ८५ ॥
अधस्तनैर्निषादाद्यैः षडन्या मूर्छनाः क्रमात् ।
मध्यमध्यममारभ्य सौवीरी मूर्छना भवेत् ॥ ८६ ॥
षडन्यास्तदधोधःस्थस्वरानारभ्य तु क्रमात् ।
षड्जस्थानस्थितैर्न्याद्यै रजन्याद्याः परे विदुः ॥ ८७ ॥
हारिणाश्वादिका गाद्यैर्मध्यमस्थानसंस्थितैः ।
षड्जादिमध्यमादींश्च तदूर्ध्वं सारयेत्क्रमात् ॥ ८८ ॥
चतुर्धा ताः पृथक्शुद्धाः काकलीकलितास्तथा ।
सान्तरास्तद्द्वयोपेताः षट्पञ्चाशदितीरिताः ॥ ८९ ॥
श्रुतिद्वयं चेत्षड्जस्य निषादः संश्रयेत्तदा ।
स काकली मध्यमस्य गान्धारस्त्वन्तरः स्वरः ॥ ९० ॥



तानक्रिया द्विधा तन्त्र्यां प्रवेशान्निग्रहात्तथा ।
प्रवेशो ध्वनिसादृश्यमसंस्पर्शस्तु निग्रहः ॥ ९१ ॥
यस्यां यावतिथौ षड्जमध्यमौ ग्रामयोः क्रमात् ।
मूर्छना तावतिथ्येव सा निःशङ्केन कीर्तिता ॥ ९२ ॥
प्रथमादिस्वरारम्भादेकैका सप्तधा भवेत् ।
तामुच्चार्यान्त्यस्वरांस्तान्पूर्वानुच्चारयेत्क्रमात् ॥ ९३ ॥
ते क्रमास्तेषु संख्या स्याद्द्वानवत्या शतत्रयम् ।
यक्षरक्षोनारदाब्जभवनागाश्विपाशिनः ॥ ९४ ॥
षड्जग्रामे मूर्छनानामेताः स्युर्देवताः क्रमात् ।
तासामन्यानि नामानि नारदो मुनिरब्रवीत् ॥ ९५ ॥
मूर्छनोत्तरवर्णाद्या षड्जग्रामेऽभिरुद्गता ।
अश्वक्रान्ता च सौवीरी हृष्यका चोत्तरायता ॥ ९६ ॥
रजनीति समाख्याता ऋषीणां सप्त मूर्छनाः ।
आप्यायनी विश्वहृता चन्द्रा हेमा कपर्दिनी ॥ ९७ ॥
मैत्री चान्द्रमती पित्र्या मध्यमे मूर्छना इमाः ।
नन्दा विशाला सुमुखी चित्रा चित्रावती सुखा ॥ ९८ ॥
आलापा चेति गान्धारग्रामे स्युः सप्त मूर्छनाः ।
ताश्च स्वर्गे प्रयोक्तव्या विशेषात्तेन नोदिताः ॥ ९९ ॥

---

### अथ शुद्धतानाः ।

तानाः स्युर्मूर्छनाः शुद्धाः षाडवौडुवितीकृताः ।
षड्जगाः सप्त हीनाश्चेत्क्रमात्सरिपसप्तमैः ॥ १०० ॥
तदाऽष्टाविंशतिस्ताना मध्यमे सरिगोज्झिताः ।
सप्त क्रमाद्यदा तानाः स्युस्तदा त्वेकविंशतिः ॥ १०१ ॥
एते चैकोनपञ्चाशदुभये षाडवा मताः ।
सपाभ्यां द्विश्रुतिभ्यां च रिपाभ्यां सप्त वर्जिताः ॥ १०२ ॥
षड्जग्रामे पृथक्ताना एकविंशतिरौडुवाः ।
रिधाभ्यां द्विश्रुतिभ्यां च मध्यमग्रामगास्तु ते ॥ १०३ ॥

हीनाश्चतुर्दशैव स्युः पञ्चत्रिंशत्तु ते [illegible] ।
सर्वे चतुरशीतिः स्युर्मिलिताः षाडवौडुवाः ॥ १०४ ॥

---

## अथ कूटतानाः ।

असंपूर्णाश्च संपूर्णा व्युत्क्रमोच्चारितस्वराः ।
मूर्छनाः कूटतानाः स्युस्तत्संख्यामभिदध्महे ॥ १०५ ॥
पूर्णाः पञ्च सहस्राणि चत्वारिंशद्युतानि तु ।
एकैकस्यां मूर्छनायां कूटतानाः सह क्रमैः ॥ १०६ ॥
षट्पञ्चाशन्मूर्छनास्थाः पूर्णाः कूटास्तु योजिताः ।
लक्षद्वयं सहस्राणि द्व्यशीतिर्द्वे शते तथा ॥ १०७ ॥
चत्वारिंशत्तु संख्याता अथापूर्णान्प्रचक्ष्महे ।
एकैकान्त्यान्त्यविरहाद्भेदाः षट्पट्स्वरादयः ॥ १०८ ॥
एकस्वरोऽत्र निर्भेदोऽप्युक्तो नष्टादिसिद्धये ।
क्रमाश्चाकूटतानत्वेऽप्युक्तास्तेपूपयोगिनः ॥ १०९ ॥
स्युः षाडवानां विंशत्या सह सप्त शतानि तु ।
औडुवानां तु विंशत्या सहितं शतमिष्यते ॥ ११० ॥
चतुःस्वराणां कूटानां चतुर्विंशतिरीरिताः ।
त्रिस्वराः षट्द्विस्वरौ द्वावेकस्त्वेकस्वरो मतः ॥ १११ ॥
आर्चिको गाथिकश्चाथ सामिकोऽथ स्वरान्तरः ।
एकस्वरादितानानां चतुर्णामभिधा इमाः ॥ ११२ ॥
उक्तशुद्धादिभेदेन निगयुक्ताश्चतुर्विधाः ।
तयोरेकैकहीनाश्च द्वेधा मूलक्रमा मताः ॥ ११३ ॥
षड्जाद्यौ मध्यमाद्यौ च चत्वारः स्युर्द्विधा द्विधा ।
चतुर्धाऽन्ये दशेत्यष्टाचत्वारिंशदमी क्रमाः ॥ ११४ ॥
सविंशतिः सप्तशती प्रागुक्ता गुणिता क्रमैः ।
चतुस्त्रिंशत्सहस्राणि षष्ट्या पञ्च शतानि च ॥ ११५ ॥



इति षाडवसंख्या स्यादथ पञ्चस्वरान्ब्रुवे ।
गाद्यौ धाद्यौ निषादाद्यौ चतुर्भेदाः षडौडुवाः ॥ ११६ ॥
अष्टावन्ये द्विधेत्येवं चत्वारिंशदिमे क्रमाः ।
सविंशतिः शते तैश्च गुणितेऽष्टौ शतानि तु ॥ ११७ ॥
चत्वारि च सहस्राणि संख्या पञ्चस्वरेष्विति ।
चतुःस्वरेषु न्यादिद्वौ चतुर्धा द्वादशापरे ॥ ११८ ॥
क्रमा द्विधेति द्वात्रिंशच्चतुर्विंशतिताडिताः ।
शतानि सप्ताष्टषष्ट्या स्याच्चतुःस्वरसंमितिः ॥ ११९ ॥
त्रिस्वरेषु तु माद्यौ द्वावभेदौ द्वादशापरे ।
द्विधा षड्विंशतिरिति क्रमास्ते षड्भिराहताः ॥ १२० ॥
षट्पञ्चाशच्छतं च स्युर्द्विस्वरेषु पुनर्द्विधा ।
रिगधन्यादयोऽष्टौ स्युः शुद्धाः षडितरे क्रमाः ॥ १२१ ॥
द्वाविंशतिस्ते तु चतुश्चत्वारिंशद्द्विताडिताः ।
एकस्वरास्त्वभेदत्वान्मौला एव चतुर्दश ॥ १२२ ॥
षड्जादेः शुद्धमध्याया भेदकं पञ्चमं विना ।
चतुःस्वरे क्रमाद्द्वंद्वेऽष्टाचत्वारिंशदीरिताः ॥ १२३ ॥
तानास्त्रिस्वरयोस्त्वेते द्वादश द्विस्वरे द्वयम् ।
एक एव स्वरस्ते त्रिषष्टिरौत्तरमन्द्रकैः ॥ १२४ ॥
पुनरुक्ता मतास्तानैर्न्यादिमार्गिक्रमाः पुनः ।
पञ्चस्वरा ये चत्वारस्तत्तानानां चतुःशती ॥ १२५ ॥
अशीत्यभ्यधिका चातुःस्वरी षण्णवतिर्भवेत् ।
द्वादश त्रिस्वरद्वंद्वे चत्वारो द्विस्वरद्वये ॥ १२६ ॥
एक एकस्वरस्तानस्तेषां पञ्चशती त्रियम् ।
त्रिनवत्या युता तानैरभिन्ना रजनीगतैः ॥ १२७ ॥
धैवतादेस्तु पौरव्याश्चत्वारः षट्स्वराः क्रमात् ।
तत्तानानां तु साशीतिः शताष्टाविंशतिर्मता ॥ १२८ ॥

औडुवानां चतुर्णां प्रागुक्ता संख्या ...तुःस्वरौ ।
त्रिस्वरौ द्विस्वरावेकस्वरः प्रागुक्तसंख्यकाः ॥ १२९ ॥
पञ्चत्रिंशतिसंयुक्ता चतुस्त्रिंशच्छती त्वियम् ।
तानानां सदृशाकारा स्यात्तानैरौत्तरायतैः ॥ १३० ॥
इत्येकाशीतिसंयुक्तं सहस्राणां चतुष्टयम् ।
तानानां पुनरुक्तानां पूर्णापूर्णैः सह क्रमैः ॥ १३१ ॥
अपनीयेत चेदेषा कूटतानमितिर्भवेत् ।
लक्षत्रयं सप्तदश सहस्राणि शतानि च ॥ १३२ ॥
नवत्रिंशद्युतानीति ज्ञानोपायोऽत्र कथ्यते ।
सहस्रैः सप्तदशभिर्युतं लक्षत्रयं तथा ॥ १३३ ॥
शतानि नव षष्टिश्च सैका कूटाः समासते ।
अङ्कानेकादिसप्तान्तानूर्ध्वमूर्ध्वं लिखेत्क्रमात् ॥ १३४ ॥
हते पूर्वेण पूर्वेण तेषु चाङ्कं परं परे ।
एक स्वरादिसंख्या स्यात्क्रमेण प्रतिमूर्छनम् ॥ १३५ ॥

---

## अथ प्रस्तारः ।

क्रमं न्यस्य स्वरः स्थाप्यः पूर्वः पूर्वः परादधः ।
स चेदुपरि तत्पूर्वः पुरस्तूपरिवर्तिनः ॥ १३६ ॥
मूलक्रमक्रमात्पृष्ठे शेषाः प्रस्तार ईदृशः ॥

---

## अथ खण्डमेरुः ।

सप्ताद्येकान्तकोष्ठानामधोऽधः सप्त पङ्क्तयः ।
तास्वाद्यायामाद्यकोष्ठे लिखेदेकं परेषु खम् ॥ १३७ ॥
वेद्यतानस्वरमितान्न्यस्येत्तेष्वेव लोष्टकान् ॥
प्राक्पङ्क्त्यन्त्याङ्कसंयोगमूर्ध्वाधः स्थितपङ्क्तिषु ।
शून्यादधो लिखेदेकं तं चाधोऽधः स्वकोष्ठकात् ॥ १३८ ॥
कोष्ठसंख्यागुणं न्यस्येत्खण्डमेरुरयं मतः ॥

---



## अथ उद्दिष्टम् ।

स्वरान्मूलक्रमस्यान्त्यात्पूर्वं यावतिथः स्वरः ।
उद्दिष्टान्त्यस्तावतिथे कोष्ठेऽस्मो लोष्टकं क्षिपेत् ॥ १३९ ॥
लोष्टचालनमन्त्यात्स्यात्त्यक्त्वा लब्धं क्रमो भवेत् ।
लोष्टाक्रान्ताङ्कसंयोगादुद्दिष्टस्य मितिर्भवेत् ॥ १४० ॥

---

## अथ नष्टम् ।

यैरङ्कैर्नष्टसंख्या स्यान्मौलिकाङ्कसमन्वितैः ।
तेषु लोष्टं क्षिपेन्मूले लोष्टस्थानमितं भवेत् ॥ १४१ ॥
नष्टतानस्वरस्थानं ततो यावतिथे पदे ।
अधः क्रमादस्ति लोष्टः स्वरस्तावतिथो भवेत् ॥ १४२ ॥
क्रमान्तिमस्वरात्पूर्वो लब्धत्यागादि पूर्ववत् ।
तानस्वरमितोर्ध्वाधः पङ्क्तिगान्त्याङ्कमिश्रणात् ॥
एकस्वरादितानानां संख्या संजायते क्रमात् ॥ १४३ ॥

---

## अथ वर्णाः ।

गानक्रियोच्यते वर्णः स चतुर्धा निरूपितः ।
स्थाय्यारोह्यवरोही च संचारीत्यथ लक्षणम् ॥ १४४ ॥
स्थित्वा स्थित्वा प्रयोगः स्यादेकस्यैव स्वरस्य यः ।
स्थायी वर्णः स विज्ञेयः परावन्वर्थनामकौ ॥ १४५ ॥
एतत्संमिश्रणाद्वर्णः संचारी परिकीर्तितः ॥

---

## अथ अलंकारः ।

विशिष्टवर्णसंदर्भमलंकारं प्रचक्षते ।
तस्य भेदा बहुविधास्तत्र स्थायिगतान्ब्रुवे * ॥ १४६ ॥

---

* याच ग्रंथकाराच्या अनूपविलास ग्रंथांत हे सर्व अलंकार आल्यानें येथें पुनः ते दिले नाहींत.

शशिना रहितेव निशा विजलेव नदी लता विपुष्पेव ।
अविभूषितेव कान्ता गीतिरलंकारहीना स्यात् ॥ १४७ ॥
रक्तिलाभः स्वरज्ञानं वर्णाङ्गानां विचित्रता ।
इति प्रयोजनान्याहुरलंकारनिरूपणे ॥ १४८ ॥

---

अथ आलापलक्षणम् ।

ग्रहांशतारमन्द्राणां न्यासापन्यासयोस्तथा ।
अल्पत्वस्य बहुत्वस्य षाडवौडुवगोरपि ॥ १४९ ॥
अभिव्यक्तिर्यत्र दृष्टा स रागालाप उच्यते ।

---

अथ आलप्तिलक्षणम् ।

वर्णालंकारसंपन्ना गमकस्थाय्यचित्रिता ।
आलप्तिरुच्यते तज्ज्ञैर्बहुवैचित्र्यसंयुता ॥ १५० ॥
आलप्त्यालापयोस्सम्यक् प्रकटीकरणं च यत् ।
रागालापनमित्युक्तं लक्ष्यलक्षणकोविदैः ॥ १५१ ॥
आलप्तिर्द्विविधा प्रोक्ता रागवस्तुविशेषणात् ।
स्वस्थानैश्चतुर्भिर्या क्रियते रूपकं विना ॥ १५२ ॥
रागालप्तिर्यत्र रागः स्वरैः संवेश्यते च सः ।
स्थायी ततश्चतुर्थस्तु द्व्यर्ध इत्यभिधीयते ॥ १५३ ॥
स्थायीस्वरादष्टमस्तु द्विगुणः परिकीर्तितः ।
द्व्यर्धद्विगुणयोर्मध्ये स्थिता अर्धस्वराभिधाः ॥ १५४ ॥
ततश्चतुर्थो द्व्यर्द्धः स्यात्स्वरे तस्मादधस्तने ।
चालनं मुखचालः स्यात्स्वस्थानं प्रथमं च तत् ॥ १५५ ॥
द्व्यर्धस्वरे चालयित्वा न्यसनं तु द्वितीयकम् ।
अर्धस्वरे चालयित्वा तदेव तु तृतीयकम् ॥ १५६ ॥
द्विगुणं चालयित्वा तु स्थायिन्यासाच्चतुर्थकम् ।
एभिश्चतुर्भिः स्वस्थानै रागालप्तिर्मता सताम् ॥ १५७ ॥
स्तोकैः स्तोकैस्तनुस्थायैः प्रसन्नैः बहुभंगिभिः ।
जीवस्वरव्याप्तिमुख्यं रागस्य स्थापना भवेत् ॥ १५८ ॥



रूपकस्थेन रागेण तालेन च विधीयते ।
या सोक्तारूपकालप्तिः सा पुनर्द्विविधा मता ॥ १५९ ॥
प्रतिग्रहणिकैकाद्या भंजनीत्यभिधीयते ।
विधाय स्थायमालप्ती रूपकावयवो यदि ॥ १६० ॥
प्रतिगृह्येत सा प्रोक्ता प्रतिग्रहणिका बुधैः ।
भंजनी द्विविधा प्रोक्ता स्थाय्यरूपकभंजनात् ॥ १६१ ॥
यदा तत्पदमानेन स्थाय्यो रूपकसंस्थितः ।
नानाप्रकारः क्रियते सा ज्ञेया स्थाय्यभंजनी ॥ १६२ ॥
तैः पदैस्तेन मानेन समग्रं रूपकं यदि ।
अन्यथावान्यथा गायेदसौ रूपकभंजनी ॥ १६३ ॥
चञ्चत्पुटादितालेन मार्गत्रयविभूषिता ।
आक्षिप्तिका स्वरपदग्रथिता कथिता बुधैः ॥ १६४ ॥

---

अथ ध्रौपदलक्षणम् ।

गीर्वाणमध्यदेशीयभाषासाहित्यराजितम् ।
द्विचतुर्वाक्यसंपन्नं नरनारीकथाश्रयम् ॥ १६५ ॥
शृंगाररसभावाढ्यं रागालापपदात्मकम् ।
पादांतानुप्रासयुतं पादांतयुगकं च वा ॥ १६६ ॥
प्रतिपादं यत्र बद्धमेवं पादचतुष्टयम् ।
उद्ग्राहध्रुवकाभोगांतरं ध्रुवपदं स्मृतम् ॥ १६७ ॥

---

अथ कुआडलक्षणम् ।

कांश्चित्तालानुपक्रम्य प्रयोगबहुलद्रुतान् ।
संकीर्णानेकगतिभिः प्रवृत्तं सुमनोहरम् ॥ १६८ ॥
कुआडाख्यं च तद्ज्ञेयं तालरूपं विचक्षणः ।
अन्यच्चैकद्वित्रिचतुस्तालानां मेलनं मिथः ॥ १६९ ॥
क्रियान्वयविभेदेन कुआडः परिकीर्तितः ।
इतिश्रीसंगीतराजभावभट्टविरचिते अनूपसंगीतरत्नाकरे
स्वराध्यायः समाप्तः ।

---

# अथ रागाध्यायः ।

श्रीगुरुगणाधिपबटुकशारदाभ्यो नमः ।

श्रीमज्जनार्दनं नत्वा संगीतार्थफलप्रदम् ।
तन्यते भावभट्टेन रागालापनमंजरी ॥ १ ॥
त्रिंशत्तु ग्रामरागाः स्युर्नवोपरागकाः स्मृताः ।
रागाणां विंशतिः प्रोक्ता भाषाः पण्णवतीः स्मृताः ॥ २ ॥
विभाषा विंशतिर्ज्ञेयाः शार्ङ्गदेवेन भाषिताः ।
चतस्रोऽन्तरभाषाः स्यू रागांगाष्टकमुच्यते ॥ ३ ॥
भाषांगाणां रुद्रसंख्या क्रियांगाणि त्रयोदश ।
उपांगत्रितयं प्रोक्तं देशीनां तु मितिर्नहि ॥ ४ ॥
प्रसिद्धानां किलोद्देशे रागांगाणि त्रयोदश ।
भाषांगाणि नवोक्तानि क्रियांगत्रितयं मतम् ॥ ५ ॥
उपांगानां तु रागाणां सप्तविंशतिरुच्यते ।
रत्नाकरे चतुःपञ्चाशसहितं तु शतद्वयम् ॥ ६ ॥
षट्षष्टिसंख्या रागाणां नृत्यनिर्णयसंज्ञके ।
चत्वारिंशद्रागबोधे संख्योक्ता द्व्यधिका बुधैः ॥ ७ ॥
एकाधिका तु नवतिः संकीर्णानां प्रकीर्तिता ।
आद्यायां रागमालायां चत्वारिंशत्प्रकीर्तिताः ॥ ८ ॥
द्व्यधिका तु द्वितीयायां षट्त्रिंशत्कथिता बुधैः ।
चतुरशीती रागाणां तृतीयायां बुधैः स्मृता ॥ ९ ॥
रागमाला भ्रारिशः स्युः कपोलकल्पिताः किल ।
मूलं न दृश्यते तासां व्यभिचारः प्रवर्तते ॥ १० ॥
तस्मादाद्या रागमाला मन्यते शास्त्रवेदिभिः ।
पारिजातोक्तरागाणां विंशत्या सहितं शतम् ॥ ११ ॥



विख्याता मध्यमग्रामा भाषा ककुभटक्कयोः ।
मधुरी ककुभे भाषा तस्यैव च विभाषिका ॥ १२ ॥
भाषा प्रेंखकरागस्य मालवी कथिता बुधैः ।
टक्ककैशिकभाषा स्याट्टक्कस्यापि च मालवा ॥ १३ ॥
कैशिकस्य विभाषा स्याद्वेसरी प्रेंखटक्कयोः ।
भाषा प्रेंखकरागस्य भाषा मालवकैशिके ॥ १४ ॥
मालवाद्यवेसरी च मांगली रागिणी पुनः ।
वोट्टपंचमयोर्भाषा भाषा मालवकैशिके ॥ १५ ॥
गौरी प्रेंखकरागस्य भाषा मालवकैशिके ।
टक्कस्य पंचमस्यापि भाषा मालवकैशिके ॥ १६ ॥
पूर्वाचार्यैः समाख्याता भिन्नपड्जस्य सैंधवी ।
गांधारपंचमस्यापि सौवीरी भिन्नपड्जयोः ॥ १७ ॥
गांधारी कथिता भाषा भाषा च ललिता तथा ।
टक्कस्य भिन्नपड्जस्य टक्कस्य पंचमस्य च ॥ १८ ॥
त्रावणी भिन्नपड्जस्य भाविनी भाष्यतेऽधुना ।
भाषा पंचमरागस्य भाषा मालवपंचमे ॥ १९ ॥
टक्कस्य च विभाषा स्यादाभीरी पंचमस्य च ।
ककुभस्य विभाषा स्याद्भाषा मालवकैशिके ॥ २० ॥
आंध्री पंचमभाषा स्याट्टक्कस्य च विभाषिका ।
स्याद्विभाषा गुर्जरी मालवकैशिकटक्कयोः ॥ २१ ॥
कैशिकी पंचमस्यैव स्याद्भाषा च विभाषिका ।
स्याद्विभाषा च पौराली भाषा मालवकैशिके ॥ २२ ॥
त्रिभाषा भिन्नपड्जस्य टक्के देवारवर्धिनी ।
विद्वद्भिः कथिता सा विभाषा मालवकैशिके ॥ २३ ॥
श्रीकंठी भिन्नपड्जस्य भाषा वेसरषाडवे ।
विभाषा सैव संप्रोक्ता रागशास्त्रविशारदैः ॥ २४ ॥

पौराली च विभाषा स्याद्भाषा म. [illegible]कैशिके ।
कांबोजी ककुभे भाषा भाषा मालवकैशिके ॥ २५ ॥
बंगालरागो रागांगं भाषांगमपि कथ्यते ।
रामक्री च क्रियांगं स्यादुपांगमपि कथ्यते ॥ २६ ॥
कर्णाटोऽपि च भाषांगमुपांगमपि मन्यते ।
रागांगं दीपको ग्रामरागो हिंदोलकः स्मृतः ॥ २७ ॥
टक्कोऽपि ग्रामरागः स्यादिति रागविनिर्णयः ।
नाटास्तु षोडशः प्रोक्ताः कर्णाटास्तु चतुर्दश ॥ २८ ॥
कल्याणो दशधा त्रेधा वेलावल्यस्तु षोडश ।
तोडिका नवधा प्रोक्ता गौरी चाष्टविधा स्मृता ॥ २९ ॥
गौडस्तु दशधा ख्यातो वराटी दशधा स्मृता ।
सप्तधा पूरिया प्रोक्ता त्रिविधासावरी स्मृता ॥ ३० ॥
केदारस्त्रिविधः प्रोक्तो द्विधा विहंगडः स्मृतः ।
सारंगोऽपि त्रिधा ख्यातो दशधा भैरवः स्मृतः ॥ ३१ ॥
कामोदः सप्तधा ख्यातः सप्तधा गुर्जरी मता ।
सैंधवी सप्तधा ख्याता मल्लारी त्रिविधा स्मृता ॥ ३२ ॥

---

### अथ नाटभेदाः ।

अथ नाटप्रभेदानामुद्देशः क्रियतेऽधुना ।
शुद्धनाटोऽथ सालंगनाटश्छायादिनाटकः ॥ ३३ ॥
केदारादिकनाटश्च तथा कल्याणनाटकः ।
तथाभीरकनाटश्च वराटीनाटकस्ततः ॥ ३४ ॥
ततः सारंगनाटश्च ततः कामोदनाटकः ।
वर्णनाटश्च विभ्भारनाटो हंमीरनाटकः ॥ ३५ ॥
कदंबनाटकः पूर्यानाटः कर्णाटनाटकः ।
पूर्याकर्णाटकोऽप्यत्र नाटभेदः प्रकीर्तितः ॥ ३६ ॥

---



एवं षोडश नाटाः स्युस्ततः कर्णाटकान् ब्रुवे ।

### अथ कर्णाटभेदाः ।

शुद्धकर्णाटरागश्च कर्णाटो नायकी ततः ॥ ३७ ॥
वागीश्वर्यादिकर्णाटः कर्णाटोऽड्डाणपूर्वकः ।
ततः सहानाकर्णाटः पूर्यादिकः ततः परम् ॥ ३८ ॥
ततो मुद्रिककर्णाटो गाराकर्णाटकस्ततः ।
हुसेनीपूर्वकर्णाटः काफीकर्णाटकस्ततः ॥ ३९ ॥
सोरटीपूर्वकर्णाटः खंबावत्यादिकस्ततः ।
ततः कर्णाटगौडः स्यात् कर्णाटास्ते चतुर्दश ॥ ४० ॥

---

### अथ कल्याणभेदाः ।

शुद्धकल्याणरागश्च ततः कल्याणनाटकः ।
हंमीरपूर्वकः पूर्या भूपालीपूर्वकस्ततः ॥ ४१ ॥
जयश्रीपूर्वकल्याणः क्षेमकल्याणकस्ततः ।
कामोदादिककल्याणः खेमकल्याणकः स्मृतः ॥ ४२ ॥
ऐमनादिककल्याणश्चाहेर्यादिस्ततः परम् ।
ततस्तिलककामोदः कल्याणास्ते त्रयोदश ॥ ४३ ॥

---

### अथ वेलावलीभेदाः ।

नट्टेन सहिताल्ख्या गौरामारुविमिश्रिता ।
केदारमिश्रिता पूर्या नट्टा गौडेन मिश्रिता ॥ ४४ ॥
देशाख्या स्यात्सुकर्णाटा पंचधा गदिता बुधैः ।
मल्लारमिश्रिता चैव मारुवेलावली स्मृता ॥ ४५ ॥
कल्याणेनैमनेनैव केदाराद्या द्विधा स्मृता ।
लक्ष्मीकामोदमिलिता कर्णाटाद्या प्रकीर्तिता ॥ ४६ ॥
सा केदारमलाराभ्यां कुडाईपूर्विका स्मृता ।
देवगिर्यड्डानयुक्ता सुहवीपूर्विका तथा ॥ ४७ ॥

विहंगडपलाशीभ्यां मारुणा शिवभूपणा ।
शुंक्षिकाद्या प्रतापाद्या शुद्धा शुद्धस्वरूपिणी ॥ ४८ ॥
स्तंभतीर्थी च छायाद्या वेलावल्यस्तु षोडश ॥

---

अथ तोडीभेदाः ।

प्रथमा स्याच्छुद्धतोडी देशीतोडी द्वितीयिका ।
बहादुरी तृतीया स्याद्गुर्जरी च चतुर्थिका ॥ ४९ ॥
छायातोडी पंचमी स्यात् षष्ठी तोडी वराटिका ।
हुसेनी सप्तमी प्रोक्ता जौनपूरी तथाष्टमी ॥ ५० ॥
आसातोडी च नवमी नवधा कथिता बुधैः ।

---

अथ गौरीभेदाः ।

प्रथमा शुद्धगौरी स्याद्गौरीभेदान् ब्रुवेऽधुना ।
आसावरीमिलाफेन जोगिया परिकीर्तिता ॥ ५१ ॥
नायकी पौरवीयुक्ता खूमरी नायकीयुता ।
सैव चैत्रीति विख्याता गौरी विभ्रारसंयुता ॥ ५२ ॥
त्रावणीसहिता सैव कथिताधुनिकैर्बुधैः ।
मालवी देवगांधारयुक्ता गौरी प्रकीर्तिता ॥ ५३ ॥
श्रीगौरी पौर्विकायुक्ता द्विविधा परिकीर्तिता ।
एवं चाष्टविधा गौरी गौडभेदान् प्रचक्ष्महे ॥ ५४ ॥

---

अथ गौडभेदाः ।

प्रथमः शुद्धगौडः स्यात् कर्णाटाद्यो द्वितीयकः ।
देशवालस्तृतीयः स्यात्तौरुष्कस्तु तुरीयकः ॥ ५५ ॥
द्रविडाद्यः पंचमः स्यात् षष्ठो मालवगौडकः ।
केदाराद्यः सप्तमः स्यात् सारंगाद्यस्तथाष्टमः ॥ ५६ ॥

---



नवमो रीतिगौडः स्यान्नारायणादिकस्तथा ।
एवं दशविधो गौडः पूर्वाचार्यैः प्रकीर्तितः ॥ ५७ ॥

अथ वराटीभेदाः ।

आद्या शुद्धवराटी स्याद्द्वितीया कौंतली मता ।
तृतीया द्राविडी प्रोक्ता चतुर्थी सैंधवी मता ॥ ५८ ॥
अपस्थाना पंचमी स्यात् षष्ठी हतस्वरा मता ।
प्रतापाद्या सप्तमी स्यादष्टमी तोडिकादिका ॥ ५९ ॥
नागवराटी नवमी पुन्नागा दशमी स्मृता ।
एकादशी तु चाशोका कल्याणा द्वादशी मता ॥ ६० ॥
एवं द्वादशधा प्रोक्ता वराटी पूर्वसूरिभिः ।

---

अथ पूरियाभेदाः ।

पूर्विका ललितायुक्ता हिंदोलांता तदा भवेत् ॥ ६१ ॥
ललिताभैरवाभ्यां तु भैरवांता प्रकीर्तिता ।
ललिताविहंगडाभ्यां स्यात् पूरियाविहंगडा ॥ ६२ ॥
युता पूर्याधनाश्री सा हिंदोलेन धनाश्रिका ।
ललिताचैमनयुता तदा पूर्यैमनी स्मृता ॥ ६३ ॥
सप्तमी शुद्धपूर्या स्यादेवं सप्तविधा स्मृता ।

---

अथ आसावरीभेदाः ।

प्रोक्ता सासावरी प्रोक्ता जोगिया नायकी त्रिधा ॥ ६४ ॥

---

अथ केदारभेदाः ।

शुद्धसुर्लानिमल्लोहाः केदारस्त्रिविधः स्मृतः ।

---

अथ विहंगडभेदौ ।

केवलो नायकी चेति द्विधा विहंगडस्तथा ॥ ६५ ॥

---

अथ सारंगभेदाः ।

शुद्धः सामंतपूर्वश्च वृंदावनी चतुर्विधः ।
ख्यातः सारंगरागोऽसौ देवगिर्यादिकस्ततः ॥ ६६ ॥

---

अथ भैरवभेदाः ।

औडुवः षाडवश्चैव संपूर्णश्च त्रिधा मतः ।
वसंतनंदकानंदस्वर्णाकर्षणपूर्वकाः ॥ ६७ ॥
गांधारपंचमाद्यश्च वहुलीपूर्वकस्ततः ।
रामभैरव इत्येवं भैरवो दशधा स्मृतः ॥ ६८ ॥

---

अथ कामोदभेदाः ।

प्रथमं शुद्धकामोदः कल्याणाद्यो द्वितीयकः ।
सामंताद्यस्तृतीयः स्याच्चतुर्थस्तिलकादिकः ॥ ६९ ॥
नाटांतः पंचमः प्रोक्तश्चाडीकामोदकस्ततः ।
षष्ठः सिंहलिकामोदः सप्तमः परिकीर्तितः ॥ ७० ॥

---

अथ गुर्जरीभेदाः ।

गुर्जरी प्रथमा शुद्धा द्वितीया वहुलादिका ।
तृतीया मंगलाख्या स्याच्चतुर्थी सामगुर्जरी ॥ ७१ ॥
पंचमी तु महाराष्ट्री षष्ठी सौराष्ट्रगुर्जरी ।
सप्तमी दक्षिणात्या स्याद्द्राविडी चाष्टमी मता ॥ ७२ ॥
एवं चाष्टविधा प्रोक्ता गुर्जरी पूर्वसूरिभिः ।

---

अथ सैंधवीभेदाः ।

टक्कभाषा च भाषा स्यात् पंचमस्य ततःपरम् ॥ ७३ ॥
भिन्नषड्जस्य भाषा स्याद्भाषा मालवकैशिके ।
शुद्धमेलोद्भवा षष्ठी प्रोक्ता हृदयभूभुजा ॥ ७४ ॥
एवं सा षड्विधा प्रोक्ता सैंधवी पूर्वसूरिभिः ।

---



अथ मल्लारभेदाः ।

मल्लारी गौंडमल्लारी मेघमल्लारिका त्रिधा ॥ ७५ ॥
अष्टाधिकं सार्धशतमुपांगानि जगुर्बुधाः ॥

---

अथ त्रिंशद्ग्रामरागाः ।

शुद्धसाधारितो रागः शुद्धकैशिकमध्यमः ।
षड्जग्रामः पंचमश्च मध्यमग्रामकस्ततः ॥ ७६ ॥
शुद्धगीत्युद्भवः सप्त षाडवः शुद्धकैशिकः ।
भिन्नषड्जो भिन्नतानो भिन्नकैशिकमध्यमः ॥ ७७ ॥
भिन्नकैशिकरागश्च भिन्नपंचमसंज्ञकः ॥
गौडपंचमसंज्ञश्च गौडकैशिकमध्यमः ।
गौडकैशिकरागश्च गौडीगीतिसमुद्भवः ॥ ७८ ॥
अथ वेसरटक्कश्च ततो वेसरषाडवः ।
ततो वेसरसौवीरस्ततोवेसरवं ट्टकः ॥ ७९ ॥
कैशिको मालवादिस्तु षष्ठो मालवपंचमः ।
टक्ककैशिकहिंदोलौ वेसराख्या इमे मताः ॥ ८० ॥
प्रथमो रूपसाधारष्टक्को भंमाणपंचमः ।
नर्तगांधारको नर्तपंचमः षड्जकैशिकः ॥ ८१ ॥
ततः ककुभसंज्ञश्च सप्त साधारणाः स्मृताः ।
एवं त्रिंशदिमे रागा ग्रामरागाः प्रकीर्तिताः ॥ ८२ ॥

---

तिलकः शकसंज्ञश्च कोकिलापंचमस्ततः ।
रेवगुप्तः पंचमादिः षाडवश्च ततः परम् ॥ ८३ ॥
भावनापंचमः पश्चान्नागगांधारकस्ततः ।
नागपंचमसंज्ञश्च नवमष्टकसैंधवः ॥ ८४ ॥
भाषाश्चतस्रः सौवीरे सौवीरी वेगमध्यमा ।
साधारणी च गांधारी षड्जाख्याः ककुभे पुनः ॥ ८५ ॥

प्रथमा मध्यमग्रामा द्वितीया भिन्नपंचमा ।
शकमिश्रा रगंती च कांबोजी मधुरी ततः ॥ ८६॥
एकविंशतिष्टक्कस्य भाषाख्या त्रिवणा मता ।
देहाली मध्यमग्रामा वैरंजी त्रिवणोद्भवा ॥ ८७ ॥
मालवी वेसरी चैव छेवाटी सैंधवी तथा ।
कोलाहला च सौराष्ट्री तथा पंचमलक्षिता ॥ ८८ ॥
पंचमी वेगरंजी च तथा गांधारपंचमी ।
मालवी तानवलिता ललिता रविचंद्रिका ॥ ८९ ॥
तानाख्याहेरिका दोह्या वेसरीत्वथपंचमे ।
दशभाषाःकैशिकी च त्रावण्यांध्रीच गुर्जरी ९० ॥
तानोद्भवाभीरिका च दाक्षिणात्या च सैंधवी ।
भाविनी मांगली चाथ चतस्रः भिन्नपंचमे ॥ ९१ ॥
शुद्धाभिन्ना वराटी च विशाला चाथ भूषिता ।
मालवी भिन्नवलिता टक्ककैशिकभाषिके ॥ ९२ ॥
नव मेखककभाषाः स्युर्वेसरी चूतमंजरी ।
गौरी च भिन्नपौराली मधुरी षड्जमध्यमा ॥ ९३ ॥
छेवाटी पिंजरी चैव तथा माल्ववेसरी ।
मालवकौशिकस्याथ बंगाली मांगली तथा ॥ ९४ ॥
गौडी हर्षपुरी चैव तथा मालववेसरी ।
खंजिनी गुर्जरी शुद्धा पौराली चार्थवेसरी ॥ ९५ ॥
आभीरी सैंधवी चैव तथा मालवरूपिका ।
एवं त्रयोदश प्रोक्तास्त्वथ वोट्टस्य भाषिका ॥ ९६ ॥
मांगली गदितात्वेका भाषा गांधारपंचमे ।
गांधारी गादता त्वेका भिन्नषड्जस्य भाषिकाः ॥ ९७ ॥
गांधारवल्ली कच्छेली स्वरवल्ली निषादिनी ।
त्रावणा मध्यमा शुद्धा दाक्षिणात्या पुलिंदिका ॥ ९८ ॥



तुंबुरा षड्जभाषा च कालिंदी ललिता तथा ।
श्रीकंठी चाथ बंगाली गांधारी चाथ सैंधवी ॥ ९९ ॥
बुधैः सप्तदश प्रोक्तास्तथा वेसरषाडवे ।
भाषाद्वयं च संप्रोक्तं बाह्या च बाह्यषाडवा ॥ १०० ॥
भाषात्रयं बुधैरुक्तमथ मालवपंचमे ।
प्रथमा स्याद्वेदवती भाविनी च विभाविनी ॥ १०१ ॥
एका तानोद्भवा भाषा तानरागस्य कीर्तिता ।
पोता ह्येका बुधैः प्रोक्ता भाषा पंचमषाडवे ॥ १०२ ॥
अथैका रेवगुप्तस्य भाषा भाषाशका मता ।
अथ वोट्टस्य भाषिका मांगली पण्णवतिर्मताः ॥ १०३ ॥
विभाषा ककुभे प्रोक्ता त्वाभीरी भोगवर्धिनी ।
मधुकरी च टक्कस्य विभाषोक्ता चतुर्विधा ॥ १०४ ॥
भाविनी गुर्जरी प्रोक्ता चांध्री देवारवर्धिनी ।
स्तः पंचमविभाषे द्वे भंमाण्यान्धालिका तथा ॥ १०५ ॥
भिन्नपंचमरागस्य विभाषा कौशिका मता ।
टक्ककैशिकरागस्य विभाषा द्राविडी मता ॥ १०६ ॥
मालवाथकैशिकस्य कांबोजी स्याद्विभाषिका ।
देवारवर्धिनी भिन्नषड्जस्य स्याद्विभाषिका ॥ १०७ ॥
कौशिकी च विभाषा स्याट्टक्ककैशिकरागजा ।
द्राविडी चाथ संप्रोक्ता भाषामालवकैशिके ॥ १०८ ॥
कांबोजी चाथ देवारवर्धिनी भिन्नषड्जके ।
कालिंदी चाथ देवारवर्धिनी मालवी तथा ॥ १०९ ॥
पौराली च विभाषाथ प्रोक्ता वेसरषाडवे न
श्रीकंठी पार्वती चैव रेवगुप्तेऽथ पल्लवी ॥ ११० ॥
विंशतिस्ता विभाषाः स्युः शार्ङ्गदेवेन कीर्तिताः ।
चतस्रोऽन्तरभाषाः स्युः ककुभे शालवाहिनी ॥ १११ ॥

किरणावली तु रेवगुप्तस्यांतरभाषिका ।
संप्रोक्ता भासवलिता शकादिवलिता तथा ॥ ११२ ॥

---

अथ पूर्वप्रसिद्धानामुद्देशः क्रियतेऽधुना ।
भाषांगानां च रागाणां शंकराभरणस्ततः ॥ ११३ ॥
घंटारवश्च रागश्च रीतिर्हंसकदीपकौ ।
लाटी पूर्णाटिका चैव पल्लवी च ततःपरम् ॥ ११४ ॥
रागांगानि च गांभीरी चौहारी खाशिकोत्पली ॥
गौरी नागांतरी नीलोत्पली छायातरंगिणी ।
गांधारगतिर्वैरंजी क्रियांगान्यथ चक्ष्महे ॥ ११५ ॥
भावक्री च स्वभावक्री मरुकक्री ततःपरम् ।
शिवक्री च त्रिनेत्रक्री कुमुदक्री ततःपरम् ॥ ११६ ॥
हनुमत्क्री तथौजक्री नागक्री च ततःपरम् ।
धर्मक्री च विपायक्रींद्रक्री रामकृतिस्ततः ॥ ११७ ॥
गौडक्री त्वथ देवक्री गौंडडोंवकृतिस्ततः ।
गुणक्री च सप्तदश त्वथोपांगानि चक्ष्महे ॥ ११८ ॥
कामोदा सिंहली छायानट्टा वल्लातिका तथा ।
रामक्री भैरवी चैव मल्लारो गौंडकस्ततः ॥ ११९ ॥
कर्णाटो द्राविडी चैव मल्लारो देशवालकः ॥

---

अथ पारिजातोक्तरागाः ।

पारिजातोक्तरागाणामुद्देशः क्रियतेऽधुना ।
धन्नासी त्रिविधा प्रोक्ता मेघमल्लारकस्ततः ॥ १२० ॥
नीलांबरी मुखारी च वसंतो भैरवस्ततः ।
नारायणी विभासश्च कर्णाटो मेघनादकः ॥ १२१ ॥
मार्गतोडी वराटी च नागपुन्नागपूर्विके ।
कल्याणा शोकपूर्वा च तोडीपूर्वा तथैव च ॥ १२२ ॥



गुणक्री वडहंसश्च गोपीकांबोजकस्ततः ।
केदारी दीपकश्चैव कौमारी च ततःपरम् ॥ १२३ ॥
केदारगौडकश्चैव ततः सारंगगौडकः ।
नारायणाद्यगौडश्च रीतिगौडस्ततःपरम् ॥ १२४ ॥
मार्गहिंदोलकष्टको नाटः सालगपूर्वकः ।
छायानाटः शुद्धनाटः कामोदाद्यस्ततःपरम् ॥ १२५ ॥
कल्याणाभीरपूर्वौ द्वौ ततः केदारनाटकः ।
वराटीवर्णसारंगपूर्वनाटाः प्रकीर्तिताः ॥ १२६ ॥
वराटी विहंगः पूर्वी पूर्वीसारंगकस्ततः ।
सामंतः कौशिकान्तश्च मंगलश्च कुडाइका ॥ १२७ ॥
कुरंगः सुहवी गौंडः सौदामिनी च पावकः ।
वैजयंती कोकिलश्च जयंतश्रीः सुराळयः ॥ १२८ ॥
ऐरावतार्जुनौ टंकस्ततो भौम्पलाशिका ।
रत्नावली कल्पतरुर्मारुःकुमुदसंज्ञकः ॥ १२९ ॥
चक्रधरः सिंहरवो मंजुघोषस्ततःपरम् ।
शिववल्लभनामा च मनोहरश्च मानवी ॥ १३० ॥
आनंदभैरवानंदभैरव्यौ शर्वरी ततः ।
शंकरानन्दनामा च मंगलाष्टकसंज्ञकः ॥ १३१ ॥
सौराष्ट्रकश्च पड्रागो राजधानी ततःपरम् ।
जिजावंतश्च परजाडानेमनहमीरकाः ॥ १३२ ॥
हंमीरनाटः कल्याणः श्यामपूर्वस्ततःपरम् ।
जयतादिककल्याणः सहाना मधुमाधवी ॥ १३३ ॥
चैत्री गौडी च संप्रोक्ता पूर्याधन्नासिका ततः ।
पूर्याकर्णाटकश्चैव वागीश्वर्यादिकस्ततः ॥ १३४ ॥
कुमारी च फिरोदस्तो धवळश्रीमनोहरी ।
सरस्वती कौरवी या परावती च कालिका ॥ १३५ ॥

राजहंसश्च सुभगा लीलावती मनोहरी ।
राजनारायणश्चैव ततो रभसमंगलः ॥ १३६ ॥
ख्यातः श्रीरमणो रागस्ततो वै देवकारिका ।
बहुली गुर्जरी चैव ततो मंगलगुर्जरी ॥ १३७ ॥
विचित्रा च्यवनो लंकादहनः कोकिलप्रियः ।
दुर्गा कदम्बनाटश्च शिवराष्ट्री ततःपरम् ॥ १३८ ॥
मंगलाष्टकनामा च रागः संक्रमणस्ततः ।
शक्तिवल्लभकः प्रोक्तः विंशत्यासहितं शतम् ॥ १३९ ॥

---

अथाधुना प्रोच्यतेऽत्र रागरागिणीसंमतम् ।
सद्योजातात्तु श्रीरागो वामदेवाद्वसंतकः ।
अघोराद्भैरवोऽभूत्तत्पुरुषात्पंचमो भवेत् ॥ १४० ॥
ईशानाख्यान्मेघरागो नाट्यारंभे शिवादभूत् ।
गिरिजाया मुखाल्लास्ये नट्टनारायणोऽभवत् ॥ १४१ ॥
नट्टनारायणस्यापि मेघस्य भैरवस्य च ।
श्रीरागस्य च संप्रोक्तं रागत्वं पूर्वसूरिभिः ॥ १४२ ॥
पंचमो ग्रामरागः स्याद्रागांगं च वसंतकः ।
शुद्धभैरवहिंदोलौ देशकारस्ततःपरम् ॥ १४३ ॥
श्रीरागः शुद्धनाटश्च नट्टनारायणश्च षट् ।
हिंदोलो दीपकश्चैव भैरवो मालकौशिकः ॥ १४४ ॥
श्रीरागो मेघरागश्च षडेते पुरुषाः स्मृताः ॥
भैरवः पंचमो नाटो मल्लारो मालवस्तथा ।
देशकारः षडेते स्यू रागा रागार्णवे मताः ॥ १४५ ॥
मालवी त्रिवणा गौडी केदारी मधुमाधवी ।
ततः पहाडिका चेति श्रीरागस्य वरांगनाः ॥ १४६ ॥
देशी देवगिरी चैव वराटी तोडिका तथा ।
ललिता चाथ हिंदोली वसंतस्य वरांगनाः ॥ १४७ ॥



विभासश्चाथ भूपाली कर्णाटी वडहंसिका ।
पटमंजरी मालश्रीः पंचमस्य वरांगनाः ॥ १४८ ॥
भैरवी गुज्जरी रेवा गुणक्री बहुली तथा ।
बंगाली भैरवस्यैव षडेता योषितो मताः ॥ १४९ ॥
मल्लारी सोरटी चैव गांधारी तदनंतरम् ।
सावेरी कौशिकी चैव शंकराभरणेति षट् ॥ १५० ॥
रागिण्यो मेघरागस्य भावभट्टेन कीर्तिताः ॥
कामोदी नाटिकाहेरी कल्याणी च हमीरिका ।
नट्टनारायणस्यैव पंचैता योषितो मताः ॥ १५१ ॥
धन्नासी भैरवी चैव सैंधवी मालवी तथा ।
आसावरी च पंच स्युर्भैरवस्य वरांगनाः ॥ १५२ ॥
भैरवो ललितश्चैव परजः पंचमस्तथा ।
बंगालः पंच संप्रोक्ता भैरवस्य सुता इमे ॥ १५३ ॥
भूपाली च वराटी च टोडिका पटमंजरी ।
तुरुष्कतोडिका पंच हिंदोलस्य वरांगनाः ॥ १५४ ॥
कामोदः प्रथमः पुत्रो वंगालस्तु द्वितीयकः ।
वसंतस्तु तृतीयः स्यात्तुर्यः सामः प्रकीर्तितः ॥ १५५ ॥
सामंतः पंचमः प्रोक्ता हिंदोलस्य सुता इमे ॥
रामक्री बहुली देशी जेतश्रीश्चापि गुर्जरी ।
पंचैता देशकारस्य योषितः परिकीर्तिताः ॥ १५६ ॥
ललितश्च विभासश्च सारंगस्त्रिवणस्ततः ।
कल्याणः पंचमः प्रोक्ता देशकारसुता इमे ॥ १५७ ॥
गौडी पाडी गुणक्री च नादरामक्रिगौंडिके ।
श्रीरागयोषितः पंच भावभट्टेन कीर्तिताः ॥ १५८ ॥
टक्कश्च देवगांधारो मालवो गौडकस्तथा ।
कर्णाटः पंचमः प्रोक्ताः श्रीरागस्य सुता इमे ॥ १५९ ॥

मालश्रीश्चैव देशाक्षी देवक्री मधुमाधवी ।
आहीरी पंचमी प्रोक्ताः शुद्धनाटस्य योषितः ॥ १६० ॥
जिजावंतश्च सालंगः कर्णाटः शुद्धनाटकः ।
छायानाटश्च पंचैते शुद्धनाटस्य सूनवः ॥ १६१ ॥
वेलावली च कांबोजी सावेरी सुहवी ततः ।
सोरटी पंचमी नट्टनारायणस्य योषितः ॥ १६२ ॥
मल्लारगौडकेदारशंकराभरणास्ततः ।
विहंगडः सुताः पंच नट्टनारायणस्द च ॥ १६३ ॥
मध्यमादिर्भैरवी च बंगाली च वराटिका ।
सैंधवी पंचमी प्रोक्ता भैरवस्य वरांगनाः ॥ ६४ ॥
टोडी खंबावती गौडी गुणक्री ककुभा तथा ।
मालकौशिकरागस्य योषितः पंच कीर्तिताः ॥ १६५ ॥
वेलावली च रामक्री देशाक्षी पटमंजरी ।
ललिता पंच संप्रोक्ता हिंदोलस्य वरांगनाः ॥ १६६ ॥
केदारिका च देशी च कामोदी नाटिका ततः ।
कर्णाटी पंच संप्रोक्ता दीपकस्य वरांगनाः ॥ १६७ ॥
वसंती मालवी मालश्री सावेरी धनाश्रिका ।
श्रीरागयोषितः पंच भावभट्टेन कीर्तिताः ॥ १६८ ॥
मल्लारी देशकारी च भूपाली गुर्जरी तथा ।
टका च पंच मेघस्य योषितः कीर्तिता बुधैः ॥ १६९ ॥
बंगाली भैरवी वेलावली पुण्यकिका ततः ।
स्नेही च पंच संप्रोक्ता भैरवस्य वरांगनाः ॥ १७० ॥
बंगालः पंचमश्चैव ललितश्च मधूकरः ।
अष्टौ सुता भैरवस्य देशाख्यो हर्षमाधवौ ॥ १७१ ॥
गुणक्रीचैव गांधारी श्रीहर्षी चांद्रिका तथा ।
धनाश्रीः पंचमी प्रोक्ता मालकौशिकयोषितः ॥ १७२ ॥



मेवाडः खोखरो मारुर्वर्धनश्चंद्रहासकः ।
मिश्रांगो नंदनश्चैव भ्रमरश्चाष्टमः सुतः ॥ १७३ ॥
मालकौशिकरागस्य संप्रोक्ता भावसूरिणा ॥
वसंती चैव तैलंगी देवक्री सुंदरी तथा ।
आभीरी पंचमी प्रोक्ता हिंदोलस्य वरांगनाः ॥ १७४ ॥
मंगलश्च वसंतश्च विनोदश्च विभासकः ।
शुभ्रांगश्चंद्रबिंबश्च ह्यानंदः सुखवर्धनः ॥ १७५ ॥
हिंदोलस्य सुताष्टौ ते संप्रोक्ता भावसूरिणा ।
कावेरी गुर्जरी तोडी कामोदी पटमंजरी ॥ १७६ ॥
दीपकस्य प्रियाः पंच हेमाडः कुसुमस्ततः ।
रामरागः कुंतलश्च कमलो बहुलस्ततः ॥ १७७ ॥
कलिंगश्चंपकश्चाष्टौ दीपकस्य सुता मताः ।
वराटी चैव कर्णाटी सावेरी गौंडिका ततः ॥ १७८ ॥
रामक्री सैंधवी चैव श्रीरागस्य वरांगनाः ।
गुणसागरनामा च कल्याणश्च विहंगडः ॥ १७९ ॥
गौंडमालवगंभीरौ कुंभः सिंधुस्तथा गडः ।
श्रीरागस्य सुताश्चाष्टौ कीर्तिता भावसूरिणा ॥ १८० ॥
मल्लारी सोरटी ह्यासावरी कौंतलिका ततः ।
बहुली पंचमी प्रोक्ता मेघरागस्य योषितः ॥ १८१ ॥
नट्टनारायणो गौंडमल्लारस्तदनंतरम् ।
कर्णाटश्चैव केदारः शंकराभरणस्ततः ॥ १८२ ॥
नारायणश्च सारंगो जालंधरः सुतोऽष्टमः ।
मेघरागसुताः प्रोक्ताः श्रीजनार्दनसूनुना ॥ १८३ ॥

---

अथ मेलनामानि ।

टोडीगौडीवराटीनां केदारशुद्धनाटयोः ।
मालवाकौशिकांतस्य श्रीरागस्य ततः परम् ॥ १८४ ॥

हंमीराहेरीकल्याणा देशाक्षी देशिकारकः ।
सारंगस्य च कर्णाटः स कामोदो हिजेजकः ॥ १८५ ॥
नादरामक्रिहिंदोलौ मुखारी सोमरागकः ।
एतेषां मेलसंजातरागाणां च यथाक्रमम् ॥ १८६ ॥
लक्षणं वक्ष्यते किंतु लोकवृत्तानुसारतः ॥

---

## अथ मेलस्वरनिर्णयः

तोडीमेलः प्रसिद्धः स्यादेकैकगतिकौ निगौ ।
मेलादतस्तोडिकाद्याः कतिचित्तु भवंति हि ॥ १८७ ॥
मत्रिका पधकंमाद्या पूर्णा तोडी प्रभातिका ॥

इति तोडीमेलः।

निगौ तृतीयगतिकौ गौडीमेलः प्रकीर्तितः ।
मेलादतो गुर्जरी च वहुला रामक्री तथा ॥ १८८ ॥
आसावरी च मारुश्च गुणक्री पटमंजरी ।
पंचमः शुद्धललितष्टक्को मालवगौडकः ॥ १८९ ॥
पूर्वी बंगालः पाडी च परजाद्याः कतिचित् परे ॥
धगत्यक्ता सत्रिका च सायं गौंडी विराजते ।
रित्रिका पेन हीना वा गुर्जरी प्रातरिष्टदा ॥ १९० ॥
मत्रिका गनिहीना वा वहुली गेयापराह्णतः ।
सत्री रामकली पूर्णा सदा गेया विरागिणी ॥ १९१ ॥
मत्रिकासावरी पूर्णा सदा गेयातिकारुणा ।
सत्रिका रिधहीना च सदा मारुः प्रशस्यते ॥ १९२ ॥
संपूर्णा स्याद्गुणकरी सायं स्फुरितपंचमा ।
सर्वदा पूर्णका पत्री राजते पटमंजरी ॥ १९३ ॥
रिहीनः पत्रिकः प्रातः पंचमः परिशोभते ।
पहीनः सत्रिकः शुद्धललितः प्रातरिष्टदः ॥ १९४ ॥
सायं च सत्रिकष्टक्कः काकल्यन्तरराजितः ।
नित्रिको रिपहीनो वा सायं मालव ईरितः ॥ १९५ ॥



संपूर्णा सत्रिका पूर्वी सायंकाले विराजते ।
सदाकालः सत्रिकश्च बंगालः सकलस्वरः ॥ १९६ ॥
सत्रिका धगहीना च सायं पाडी विराजते ॥

इति गौडीमेलः।

निमौ तृतीयगतिकौ वराटीमेल एव सः ।
अस्माद्वराट्यः श्यामांदिवराट्याद्या ह्यनेकशः ॥ १९७ ॥
शुद्धा वराटिका सत्रिः सदा पूर्णा मनोहरा ।
सत्रिः श्यामवराटी च पूर्णा काकलिराजिना ॥ १९८ ॥

इति वराटीमेलः।

रिधौ द्वितीयगतिकौ तृतीयगतिकौ निगौ ।
एष केदारमेलः स्यादतो जाताश्च रागकाः ॥ १९९ ॥
केदारगौंडमल्हारनट्टनारायणास्ततः ।
वेलावली च भूपाली कांबोजी मधुमाधवी ॥ २०० ॥
शङ्कराभरणः सावेरी सुव्वी नारायणी ततः ।
केदारनाटाद्यन्येऽपि रागाः स्युरेतन्मेलतः ॥ २०१ ॥
नित्री रिपौ वा केदारो निशीथे करुणप्रियः ।
धत्रिः प्रभाते गौण्डः स्यात्संपूर्णः शंकरप्रियः ॥ २०२ ॥
धत्रिः सपाभ्यां हीनोऽयं मल्हारो ह्युषसि प्रियः ।
नट्टनारायणो रागः काकल्यन्तरराजितः ॥ २०३ ॥
संपूर्णः सततं सत्रिर्वर्षाकालेऽतिवल्लभः ।
धत्रिका रिपहीना वा प्रातर्वेलावलीष्टदा ॥ २०४ ॥
गत्रिर्निमाभ्यां हीना च भूपाली प्रातरुत्तमा ।
कांबोजी मनिहीना वा सत्रिः सान्तरकाकली ॥ २०५ ॥
मत्रिः प्रातरम्या गेया रिधास्ता मधुमाधवी ।
शंकराभरणः सत्रिः प्रातः संपूर्णमुद्रितः ॥ २०६ ॥
सपवर्ज्या च सावेरी धत्रिका प्रातरिष्टदा ।
सत्रिः पूर्णा च सुद्वी प्रातःकाले सुखप्रदा ॥ २०७ ॥

नारायणी गत्रिका च संपूर्णा तपसि प्रिया ।
केदारनाटकः सत्रिः संपूर्णः सायमभीप्सितः ॥ २०८ ॥
देवक्री पेन हीना वा सत्रिका तुर्ययामगा ॥

इति केदारमेलः ।

तृतीयगतिकौ शुद्धनाटमेले रिधौ गनी ।
अस्मिन्मेले संभवंति शुद्धनाटादिकाः परे ॥ २०९ ॥
सत्रिकः शुद्धनाटोऽसौ सायं गंभीरनादवान् ॥

इति शुद्धनाटमेलः ।

एकैकगतिकौ रिधौ निगौ मालवकैशिके ।
अस्मिन्मेले मालवश्रीर्धन्नासी भैरवी तथा ॥ २१० ॥
सैंधवी देवगांधार इत्याद्या ह्यपरे यथा ।
सत्रिः सायं सुरसिको मालवकैशिकोऽधगः ॥ २११ ॥
रिधाल्पा सत्रिका पूर्णा मालवश्रीः सदा रुचिः ।
सत्रिधा रिधवर्ज्या च धन्नासी प्रातरेव हि ॥ २१२ ॥
सत्रिधा रिपमुद्रा च पूर्णा भैरविका सदा ।
सत्रिका त्वरिपा नित्यं सैंधवी गमकैर्युता ॥ २१३ ॥
संपूर्णः सत्रिको देवगांधारः सर्वदा रुचिः ॥

इति मालवकैशिकमेलः ।

धरिन्येकैकगतिकागस्तृतीयगतिर्यदा ।
श्रीरागमेल एष स्यात् श्रीरागाद्या ह्यनेकशः ॥ २१४ ॥
श्रीरागः सत्रिकः सायं धगोनः श्रीरसप्रियः ॥

इति श्रीरागमेलः ।

द्वितीयगतिको रिश्च तृतीयगतिकौ निगौ ।
हंमीरमेल एषः स्याद्धंमीराद्या ह्यनेकशः ॥ २१५ ॥
सत्रिस्तृतीययामे च हंमीरः पूर्ण ईरितः ॥

इति हंमीरमेलः ।

एकतृतीयगतिकौ गनी स्वरौ यथाक्रमम् ।
द्वितीयगतिको रिश्च त्वाहेरीमेल एष हि ॥ २१६ ॥



आहेरीमेलतोऽन्येऽपि आहेर्याद्या ह्यनेकशः ।
सत्रिका सायमाहेरी संपूर्णादिरसाश्रिता ॥ २१७ ॥

इति आहेरीमेलः ।

मनी तृतीयगतिकौ द्वितीयगतिकोऽपि रिः ।
तृतीयगतिगांधार एष कल्याणमेलकः ॥ २१८ ॥
अतोऽपि मेलात् कल्याणप्रमुखाद्या भवंति हि ।
सत्रिः संपूर्णः कल्याणः सायंकाले महारुचिः ॥ २१९ ॥

इति कल्याणमेलः ।

तृतीयगतिका निगौ रिश्च देशाक्षिमेलकः ।
अतोऽपि मेलाद्देशाक्षीप्रमुखाद्या भवंति हि ॥ २२० ॥
गत्री रिहीना देशाक्षी प्रातर्गेया विचक्षणैः ॥

इति देशाक्षीमेलः ।

तृतीयगतिनिगमा देशिकारस्य मेलकः ।
देशिकारस्तिरवणी देशी ललितदीपकौ ॥ २२१ ॥
विभासाद्या हि केचित्तु संभवंत्यत्र मेलतः ।
देशिकारोऽपराह्ने स्यात् सत्रिः संपूर्णको भवेत् ॥ २२२ ॥
संपूर्णा सत्रिका गेया सायंकाले च त्रावणी ।
पहीना रित्रिधा देशी सदा गेया विचक्षणैः ॥ २२३ ॥
धत्रिः संपूर्णो ललिता प्रातर्गेया च गायकैः ।
संध्याकाले च गातव्यो धत्रिः संपूर्णदीपकः ॥ २२४ ॥
विभासः सत्रिकः पूर्णः पहीनः प्रातरेव हि ॥

इति देशिकारमेलः ।

तृतीयगतिमनिधा द्वितीयगतिकोऽपि रिः ।
तुरीयगतिको गश्च मेलः सारंगरागजः ॥ २२५ ॥
मेलादतोऽपि सारंगप्रमुखाद्या भवंति च ।
सत्रिः सारंगः संपूर्णः सदा गेयः पराह्णतः ॥ २२६ ॥

इति सारंगमेलः ।

तृतीयगतिगनिधा द्वितीयगतिकोऽपि रिः ।
तदा कर्णाटमेलः स्यात् तत्र संभूतरागकाः ॥ २२७ ॥
कर्णाटरागः सामंतः सौराष्ट्री छायनाटकः ।
नित्री रिधाल्पो हीनो वा कर्णाटः सायमिष्टदः ॥ २२८ ॥
सामंतकस्त्रिसः सायं काकल्यंतरभूषितः ।
छायानाटस्त्रिसः सायं काकल्यंतरजीवनः ॥ २२९ ॥
सत्रिः सायं च सौराष्ट्री पूर्णो शृंगारवल्लभा ॥

इति कर्णाटमेलः ।

निगावेकैकगतिकौ तृतीयगतिकोऽपि मः ।
एष कामोदमेलः स्यादस्मादन्यतराः परे ॥ २३० ॥
सत्रिः संपूर्णः कामोदो गायेत्तुरीययामतः ॥

इति कामोदमेलः ।

गनी ह्येकगती यत्र हिजेजाख्यस्य मेलकः ।
मेलादतो हिजेजश्च भैरवाद्याश्चनेकशः ॥ २३१ ॥
हिजेजः सर्वदा पूर्णो नित्रिः सांतरकाकली ।
रिहीनो भैरवः सत्रिः प्रातर्गेयो विशुद्धधीः ॥ २३२ ॥

इति हिजेजमेलः ।

निगौ ह्येकगती मेलो नादरामक्रतश्च सः ।
मेलादतो नादरामक्याद्याश्च कतिचित्परे ॥ २३३ ॥
सत्रिः सायं च संपूर्णो नादरामक्रिया भवेत् ॥

इति नादरामकीमेलः ।

द्वितीयगतिको रिश्च त्वेकैकगतिकौ गनी ।
तदा हिंदोलमेलः स्यादतो हिंदोलरागकः ॥ २३४ ॥
वसंतरागादन्येऽपि केचित्केचिद्भवंति हि ।
हिंदोलको रिपत्यक्तः सत्रिकः प्रातरेव हि ॥ २३५ ॥
सत्रिर्वसंतः संपूर्णः प्रातर्गेयो ह्यनंगदः ॥

इति हिंदोलमेलः ।



सप्तस्वराः स्वभावस्था मुखारीमेलकां भवेत् ।
मुखारीमेलतोऽन्येऽपि मुख्याद्या भवंति च ॥ २३६ ॥
मुखारी सर्वदा गेया पूर्णा सत्रिस्त्रिधा मता ॥

इति मुखारीमेलः ।

निरेकगतिकः सोमरागः सदा शिवप्रियः ।
अमुष्मादपि केचित्तु रागानंता भवंति हि ॥ २३७ ॥
सत्रिकः सोमरागः स्यात्सदाकाले शिवप्रियः ॥

इति सोममेलः ।

इत्याद्यनन्ता रागाश्च पूर्वोक्ता गतिमेलतः ।
अमुना चाधुना सम्यग्योजनीया विचक्षणैः ॥ २३८ ॥
अन्येऽपि पारसीकिया रागाः परदनामकाः ।
संपूर्णाः सर्वगमकाः काकल्यन्तरिताः सदा ॥ २३९ ॥
रहावी देवगान्धारे कानरे च निशावरः ।
सारंगे माहुरे नाम जंगलो वंगालके मतः ॥ २४० ॥
देश्यामाहङ्को गेयो वाग मल्लाररागके ।
केदारेऽपि च मुल्ताथ धन्नास्यां च इराककः ॥ २४१ ॥
जिजावन्ते च हौसेनी मालवे मुसलीककः ।
कल्याणे यमनं गायेत् सर्पर्दोऽथ विलावले ॥ २४२ ॥
देशिकारे वाखरेज आसावर्यां हिजेजकः ।
देवगिर्यां मुगाकाख्य एवमन्येऽपि योजयेत् ॥ २४३ ॥
बहुरसमकरंदा सच्चिदानंदकंदा ।
अविमुकुलितयासां किन्नरीरंगराशी ॥
नभवररतिमोदा कामिनां श्रीविनोदा ।
जनभरश्रुतिचूडां मंजरी रागचूडा ॥ २४४ ॥

## अथ श्रीरागः ।

मञ्जर्याम्—

धरिन्येकैकगतिका गस्तृतीयगतिर्यदा ।
श्रीरागमेल एष स्यात् श्रीरागाद्या ह्यनेकशः ॥ २४५॥
श्रीरागः सत्रिकः सायं धगोनः श्रीरसप्रदः ॥

ध्यानम् ।

रागमालायाम्—

शृंगारी सुन्दरस्तत्पुरुषवदनजः कंठनक्षत्रमालः ।
श्रीरागः श्वेतवासाः प्रथमगतिगताधैवतोरिर्गनी स्युः ॥
आरोहेऽधैवतोऽगस्त्ववगमनयुतः सत्रिपूर्णोऽत्र गौरः ।
ग्रीष्मे सायं सुनृत्ये विलसति सरसं हस्तलग्नालिपद्मः॥२४६॥

दर्पणे—

श्रीरागः स च विख्यातः सत्रयेण विभूषितः ।
पूर्णः सर्वगुणोपेतो मूर्छना प्रथमा मता ॥ २४७ ॥
केचित्तु कथयन्त्येनं रिषभत्रयसङ्गतम् ॥

---

ध्यानम् ।

अष्टादशाब्दः स्मरचारुमूर्ति-
र्धीरोल्लसत्पल्लवकर्णपूरः ॥
षड्जादिसेव्योऽरुणवस्त्रधारी ।
श्रीरागराजः क्षितिपालमूर्तिः ॥ २४८ ॥

---

## अथ ध्रुवपदानि* ।

---

## अथ मालवी ।

सत्रिका निविहीना वा सायं मालविका स्मृता ।

* टीप—ग्रंथकारानें हिंदीभाषेंत प्रत्येक रागांत अनेक गीतें लिहिलीं आहेत, परंतु त्यांवर ताल व स्वर दिले नसल्यामुळें ग्रंथगतराग समजण्यास त्यांचा कांहीं उपयोग होणार नाहीं म्हणून तीं येथें दिलीं नाहींत.



दर्पणे—

मालवी औडुवा ज्ञेया नित्रया रिपवर्जिता ।
रजनी मूर्छना ज्ञेया काकलीस्वरमंडिता ॥ २४९ ॥

ध्यानम् ।

नितंबिनीचुंबितवक्त्रपद्मः ।
शुकद्युतिः कुंडलवान् प्रमत्तः ॥
संकेतशालां प्रविशन् प्रदोषे ।
मालाधरो मालवरागराजः ॥ २५० ॥

---

## अथ त्रावणी ।

मञ्जर्याम्—

संपूर्णा सत्रिका गेया सायंकाले च त्रावणी ॥

चंद्रोदये—

सांशग्रहा सांतवती च पूर्णा ।
सा त्रावणी दीव्यति वासरांते ॥ २५१ ॥

नृत्यनिर्णये—

देशीसन्मेलजातस्त्रिविधसमपसः पूर्णरूपोऽतिगौरः ।
कंठे मौक्तिकमालो धृतमुकुटशिराश्चित्रवासाश्च रम्यः ॥
पुष्पश्रीकंदुहस्तो युवजनसहितो मन्मथानंदकर्ता ।
शृंगारी पण्यवीथ्यां तरुणतिरवणः शोभते सायमेषः ॥२५२॥

हृदयप्रकाशे—

ऋषभादिर्मनित्यागादौडुवस्त्रिवणो भवेत् ॥

पारिजाते—

गौरीमेलसमुत्पन्ना त्रिवणा मस्वरोज्झिता ।
अवरोहणवेलायां षड्जोद्ग्राहांशसरिस्वरा ॥ २५३ ॥

रागविबोधे—

सन्यासरिग्रहांशा संपूर्णा त्रावणी तु सायाह्ने ॥

---

## अथ गौरी ।

पारिजाते—

रजनी मूर्छना ज्ञेया रिकोमला धकोमला ।
गतीव्रा सा नितीव्रा च गौरी न्यंशस्वरा मता ॥ २५४ ॥

नृत्यनिर्णये—

रामक्रीमेलजाता धगपरिरहिता सत्रिधा षोडशाब्दा ।
चित्रं वस्त्रं दधाना करधृतकमलाऽऽकर्णनेत्रा सुकेशी ॥
चैत्री मुल्तानिपूर्वी वरयवनपुरीकर्पटीभिश्च सार्धम् ।
संक्रीडंती दिनान्ते चतुररतिकला गौरदेहा तु गौडी ॥ २५५ ॥

दर्पणे—

ग्रहांशन्याससड्जास्यादिषड्ज्या सुखप्रदा ।
मूर्छना प्रथमा ज्ञेया गौरी सर्वांगसुंदरी ॥ २५६ ॥

---

ध्यानम् ।

निवेशयंती श्रवणेऽवतंस-
माम्रांकुरं कोकिलनादरम्यम् ॥
श्यामा मधुस्यंदितसूक्ष्मनादा ।
गौरीयमुक्ता किल कोहलेन ॥ २५७ ॥

---

## अथ केदारः ।

रागमंजर्याम्—

रिधौ द्वितीयगतिकौ तृतीयगतिकौ निगौ ।
एष केदारमेलः स्यात् ततो जाताश्च रागकाः ॥ २५८ ॥
केदारो गौंडमल्लारो नट्टनारायणस्ततः ।
वेलावली च भूपाली कांबोजी मधुमाधवी ॥ २५९ ॥
शंकराभरणः सावेरी सुहवी नारायणी ततः ।
केदारनाटश्चान्येऽपि रागास्युरेतन्मेलतः ॥ २६० ॥

चंद्रोदये—

लघ्वादिकौ षड्जकमध्यमौ च ।
शुद्धौ समौ पंचमको विशुद्धः ॥



निगौ विशुद्धौ च यदा भवंति ।
तदा तु केदारकमेल उक्तः ॥ २६१ ॥
केदारनारायणगौंडकाख्यौ ।
वेलावली शंकरभूषणाख्यः ॥
स्यान्नट्टनारायणमध्यमादी ।
मल्लारको गौंडकनामधेयः ॥ २६२ ॥
सालंगनट्टाभिधकश्च भूपा-
लिका च सावेर्यभिधानिका च ॥
सौराष्ट्रिका नाम तथापि चान्ये ।
कांबोजिकाद्याश्च भवंत्यमुष्मात् ॥ २६३ ॥

नृत्यनिर्णये—

सव्ये दंदं त्रिशूलं त्वपरकरतले शुभ्रवस्त्रं दधानः ।
भस्मांगो रक्तनेत्रो विमलभुजगलो द्वीपिचर्मोपविष्टः ॥
नासाग्रे दत्तदृष्टिर्गिरिशजपमना वेष्टितः शिष्यवर्गैः ।
केदारो वारिधोऽस्ति त्रिविधनिसुहवीमेलजातो निशीथे ॥ २६४ ॥

हृदयप्रकाशे—

गनीतीव्रतरे मेले केदारः सामनाटकः ।
खंबावती च हंमीरः शंकराभरणस्ततः ॥ २६५ ॥
जयत्पूर्वश्च केदारः पूरियोपपदस्तथा ।
बिहागराहीरनाटौ मारुभीमपलाशिका ॥
छायाकेदारनाटौ च मालकौशिक इत्यपि ।
भूपाली चाथ केदारः संपूर्णो गादिमूर्छनः ॥ २६६ ॥

रागविबोधे—

मल्लारीमेल उक्तास्तीव्रतररिमृदुमतीव्रतरधाश्च ।
मृदुसः शुद्धाः समपा अस्मादेते तु मल्लारिः ॥ २६७ ॥
नटयुक् स पूर्वगौडो भूपालीगौडशंकराभरणाः ।
नटनारायणनारायणगौडौ कोऽपि केदारः ॥ २६८ ॥
सालंकनाटवेलावल्यावथ मध्यमादिरागश्च ।
सावेरी सौराष्ट्री जायंतेऽन्येऽपि देशीस्थाः ॥ २६९ ॥

न्यंशन्यासग्रहकः पूर्णो निश्येव केदारः ॥

पारिजाते—

गनी तीव्रौ तु केदारे रिधौ न स्तोऽथ गादिमः ॥

---

## अथ मधुमाधवी ।

नृत्यनिर्णये—

मुग्धा गौरी विचित्रांबररचिततनुः सर्वशृंगारयुक्ता ।
माद्यंतांशारिधा वा द्विगतिगतरिधा वन्हिगत्यंन्तगा च ॥
भूरेखाचापधात्री मृगशिशुनयना तीव्रनेत्रांतबाणा ।
भर्तुर्गेहे सखीभिः सह किल मधुमाधव्युपः संश्रयाति ॥२७०॥

---

## अथ पहाडीरागः ।

पारिजाते—

गौर्युत्पन्ना पहाडी स्यादवरोहे गवर्जिता ।
उद्ग्राहे षड्जसंपन्ना न्यासांशरिसुशोभिता ॥ २७१ ॥

---

## अथ वसंतरागः ।

रत्नाकरे—

वसन्तस्तत्समुद्भवः ।
पूर्णस्तल्लक्षणो देशीहिंदोलोऽप्ययं कथ्यते ॥
वराटीललिताभ्यां च शुद्धरिषभरागतः ।
उत्पन्नोऽयं वसंतस्तु संकीर्णस्तेन लक्षितः ॥ २७२ ॥

ध्यानम् ।

शिखंडिबर्हौच्चयबद्धचूडः ।
कर्णावतंसीकृतशोभनाम्रः ॥
इंदीवरश्यामतनुर्विलासी ।
मत्तालिनादादरवान् वसंतः ॥ २७३ ॥



मंजर्याम्—

सत्रिर्वसंतः संपूर्णः प्रातर्गेयोऽप्यनङ्गदः ॥

चंद्रोदये—

सांशांतकः सग्रहकश्च पूर्णो ।
वसंतनामोषसि गीयतेऽसौ ॥ २७४ ॥

नृत्यनिर्णये—

जातो हिंदोलमेले स्वरसकलयुतः सत्रिकश्च प्रभाते ।
त्वारामे क्रीडमानो नवदलकुसुमामोदलुब्धालिवृंदः ॥
तांबूलास्योऽतिगौरो नृपतिसमदृशो रक्तवस्त्रश्च सार्धं ।
योषिद्भिः सर्वदा सस्वररभसमहद्धास्ययुक्तो वसंतः ॥ २७५ ॥

हृदयप्रकाशे—

आरोहे पोज्झितो माद्यः पूर्णो धांशो वसंतकः ॥

पारिजाते—

षड्जादिमूर्छनो मांतो गनिर्तीव्रो वसंतकः ॥

---

## अथ देशी ।

पारिजाते—

गनित्यक्तावथारोहे रिधावत्र च कोमलौ ।
षड्जादिस्वरसंभूता देश्यामंशस्तु रिस्मृतः ॥ २७६ ॥

---

## अथ देवगिरी ।

पारिजाते—

अवरोहे धगौ न स्तो धस्तु तीव्रतरो भवेत् ।
देवगिर्यां गनी तीव्रौ यत्र स्यात् षड्जमूर्छना ॥२७७॥

---

## अथ वराटी ।

पारिजाते—

अथ शुद्धवराट्यां तु रिगौ कोमलपूर्वकौ ।

मस्तु तीव्रतरो धः स्यात् कोमलस्तीव्रनिस्वरः ॥
धैवतोद्ग्राहयुक्ता सा निगौ न्यासांशकौ स्मृतौ ॥ २७८ ॥

---

अथ तोडीवराटी ।

पारिजाते—

रिधौ च कोमलौ प्रोक्तौ यत्र तीव्रतरश्च मः ।
उद्ग्राहकौ पधौ स्यातां वराटी तोडिका च सा ॥ २७९ ॥

---

अथ नागवराटी ।

पारिजाते—

अथ नागवराट्यां तु मस्तु तीव्रतरो भवेत् ।
कोमलो धैवतः प्रोक्तो गधावुद्ग्राहकौ स्मृतौ ॥ २८० ॥

अथ पुन्नागवराटी ।

पारिजाते—

पुन्नागाख्यवराट्यां तु निपादस्तीव्रसंज्ञकः ।
मस्तु तीव्रतरः प्रोक्तो गधावुद्ग्राहकौ स्मृतौ ॥ २८१ ॥

---

अथ प्रतापवराटी ।

पारिजाते—

मतीव्रतरसंयुक्ता प्रतापोपपदान्विता ।
वराटी च निनायुक्ता तीव्रसंज्ञेन गादिका ॥ २८२ ॥

---

अथ कल्याणवराटी ।

पारिजाते—

कल्याणोपपदा या सा वराटी गादिमूर्छना ।
कल्याणमेलसंभूता मपांशन्यासका स्मृता ॥ २८३ ॥

दर्पणे—

षड्जग्रहांशकन्यासा वराटी कथिता बुधैः ।
प्रथमा मूर्छना यस्यां संपूर्णा कीर्तिवर्धिनी ॥ २८४ ॥



ध्यानम् ।

विनोदयंती दयितं सुकेशी ।
सुकंकणा चामरचालनेन ॥
कर्णे दधाना सुरवृक्षपुष्पं ।
वरांगनेयं कथिता वराटी ॥ २८५ ॥

---

अथ तोडी ।

मंजर्याम्—

तोडीमेलः प्रसिद्धः स्यादेकैकगतिकौ निगौ ।
मत्रिका पधकंपाढ्या पूर्णा तोडी प्रभातिका ॥ २८६ ॥

रागमालायाम्—

सव्ये हस्ते सुदंडी त्वपरकरतले तालयुग्मं दधाना ।
लिप्तांगा चंदनाद्यैश्च सुसितवसना सर्वभूषाभियुक्ता ॥
प्रौढा तांबूलवक्त्रा विकसितनयना मोहिनी मुक्तचूर्णा ।
पूर्णा मार्यंनमध्या प्रथमगनिगनिस्तोडिका प्रातरेव ॥२८७॥

ध्यानम् ।

दर्पणे—

तुषारकुंदोज्वलदेहयष्टिः ।
काश्मीरकर्पूरविलिप्तदेहा ॥
स्तनांतरे मौक्तिकहारशोभा ।
सितानना राजति तोडिकेयम् ॥ २८८ ॥

---

अथ ललितः ।

संपूर्णः सत्रिकः शुद्धललितः प्रातरिष्टदः ॥

रागमालायाम्—

देशी मेले प्रजातः स्वरसकलयुतो धत्रिकश्चंचलाक्षः ।
हस्ते पद्मं दधानः शुचिवसनरतः श्लिष्टशृंगारसर्वैः ॥

मुग्धस्त्रीसत्समक्षं हसति सकपटं पूर्णतांबूलवक्त्रः ।
कामी कामावतारः कुटिलसुललितो भाति धृष्टः प्रभाते ॥२८९॥

दर्पणे—

रिपवर्ज्या च ललिता औडुवा सत्रया मता ।
मूर्छना शुद्धमध्या स्यात् संपूर्णा केचिदूचिरे ॥ २९० ॥
धैवतत्रयसंयुक्ता द्वितीया ललिता मता ॥

ध्यानम् ।

प्रफुल्लसप्तच्छदमाल्यधारी ।
युवा च गौरोल्लसल्लोचनश्रीः ॥
विनिश्वसन् वासगृहात् प्रभाते ।
विलासवेषो ललितः प्रदिष्टः ॥ २९१ ॥

---

## अथ हिंदोलः ।

पारिजाते—

हिंदोलेऽथ रिपौ त्याज्यौ कोमलो धैवतो भवेत् ॥

रागमालायाम्—

अस्मिन् रागे भवेतां प्रथमगतिगनी सत्रिकोऽत्रारिपोऽसौ ।
गौरांगः पीतवासा घनकुसुमवने क्रीडको दोलयाने ॥
हिंदोलः स्त्रीसहायः कटकमुकुटमहत्कुंडलाढ्यो मनस्वी ।
प्रातःकाले वसंते विचरति चतुरो वामदेवाभिजातः ॥२९२॥

दर्पणे—

हिंदोलको रिधत्यक्तः सत्रयो गदितो बुधैः ।
मूर्छना शुद्धमध्या स्यादौडुवः काकलीयुतः ॥ २९३ ॥

ध्यानम् ।

नितंबिनीमंदतरंगितासु ।
दोलासु खेलासुखमादधानः ॥
खर्वः कपोतद्युतिरामयुक्तो ।
हिंदोलरागः कथितो मुनींद्रैः ॥ २९४ ॥

---



## अथ भैरवरागः ।

स च त्रिधा । औडुवषाडवसंपूर्णभेदात् ।

धविकर्षशमाधाधरिस्थसांदोलनारिपा ।
औडुवा षाडवा पूर्णा भैरवी भाति मूर्छना ॥ २९५ ॥

ध्यानम् ।

गंगाधरः शशिकलातिलकस्त्रिनेत्रः ।
सर्पैर्विभूषिततनुर्गजकृत्तिवासाः ॥
भास्वत्त्रिशूलकर एष नृमुंडधारी ।
शुभ्रांबरो जयति भैरव आदिरागः ॥ २९६ ॥

रागमालायाम्—

सद्योजातोद्भवोऽयं प्रथमगतिगानिः सत्रिकोऽरिः कपर्दी ।
रक्तः श्यामस्त्रिशूली सिततरवसनो भस्मदेहस्त्रिनेत्रः ॥
कंठे शृंगीं दधानः श्रवणयुगलतो मुद्रिके चंद्रचूडः ।
हेमंतेऽपि प्रभाते विलसति वृषभो भैरवः शुद्धपूर्वः ॥ २९७ ॥
भस्मांगः कंठशृंगी श्रवणयुगलतः शंखमुद्रे दधानः ।
पादत्राणे प्रवाले फणिपतिसुजटाबद्धमौलिः प्रमत्तः ॥
उज्झालस्यानुयायी पटुतरवचनः किन्नरीवाद्यमानः ।
पूर्णो धाद्यंतमध्यस्त्वनलविधुगनिर्भैरवः पूर्वयामे ॥ २९८ ॥

---

## अथ भैरवी ।

रत्नाकरे—

धांशन्यासग्रहा तारमंद्रगांधारशोभिता ।
भैरवी भैरवोपांगं समशेषस्वरा भवेत् ॥ २९९ ॥

पारिजाते—

षड्जादिमूर्छनायुक्ता भैरवी स्याद्धकोमला ।
मांशस्वरग्रहन्यासा भैरवी स्याद्धकोमला ॥ ३०० ॥
रिणारोहे त्वपन्यासा पंचमेनोभयोरपि ।
षड्जेनाप्यवरोहेण सर्वदा सुखदायिनी ॥ ३०१ ॥

रागमालायाम्—

धन्नासीमेलजाता स्वरसकलयुता चादिमध्यान्तषड्जा ।
तन्वंगी चंद्रवक्त्रा कनकसमतनुः श्वेतवस्त्रं दधाना ॥
भाले सिंदूरबिंदुः विकसितवदना सर्वशृंगारकाढ्या ।
नृत्यंती गीयमाना द्रविडजनरता भैरवी सा प्रभाते ॥ २०२ ॥

दर्पणे—

संपूर्णा भैरवी ज्ञेया ग्रहांशन्यासमध्यमा ।
सौवीरी मूर्छना ज्ञेया मध्यमग्रामचारिणी ॥ २०३ ॥
कैश्चिदेषा भैरववत् स्वरैर्ज्ञेया विचक्षणैः ॥

---

ध्यानम् ।

स्फटिकरचितपीठे रम्यकैलासशृंगे ।
विकचकमलपत्रैरर्चयंती महेशम् ॥
करधृतघनवाद्या पीतवर्णायताक्षी ।
सुकविभिरियमुक्ता भैरवी भैरवस्त्रीः ॥ २०४ ॥

---

## अथ गुर्जरी ।

मंजर्याम्—

रित्रिका पेन हीना वा गुर्जरी प्रातरिष्टदा ॥

रागमालायाम्—

संधत्ते हस्तमूले करिरदवलयान्यंघ्रिमंजीरयुग्मम् ।
नासाग्रे हेमपुष्पं कनकसमनिभां कंचुकीं रक्तवस्त्राम् ॥
बिंबोष्ठी रक्तवर्णा दिवसुररचिता मुक्तकच्छायसौ वा ।
रामक्रीमेलसौख्या त्रिसमयगिरसौ गुर्जरीयं प्रभाते ॥ २०५ ॥

दर्पणे—

ग्रहांशन्यासऋषभा संपूर्णा गुर्जरी मता ।
पौरवी मूर्छना तस्या बंगाल्या सह मिश्रिता ॥ २०६ ॥

---



ध्यानम् ।

श्यामा सुकेशी मलयद्रुमाणाम् ।
मृदूल्लसत्पल्लवतल्पमध्ये ॥
श्रुतिस्वराणां दधती विभागम् ।
तंत्रीमुखा दक्षिणगुर्जरीयम् ॥ २०७ ॥

---

## अथ रेवा ।

पारिजाते—

गौरीमेलसमुत्पन्ना षड्जोद्ग्राहेण मंडिता ।
मनित्यक्ता सदा रेवा गपादियमलस्वरा ॥ २०८ ॥

---

## अथ गुणक्री ।

पारिजाते—

रिधकोमलसंयुक्ता गनिवर्ज्या गुणक्रिया ।
धैवतोद्ग्राहसंयुक्ता क्वचिद्गांधारसंयुता ॥ २०९ ॥

रागमालायाम्—

गुर्जर्या मेलजाता स्फुरिततरसपा न्यादिमध्यांतपूर्णा ।
वक्षोहारायताक्षी वरसितवसना रक्तकूर्पासिका या ॥
नानाशृंगारभूषा मृदुमधुवचना श्यामलांगी सुतन्वी ।
भर्तुः संकेतकं सद्रिमलगुणकरी कामिनी याति सायम् ॥ २१० ॥

दर्पणे—

रिधहीना गुणकरी औडुवा परिकीर्तिता ।
निग्रहांशा तु निन्यासा कैश्चित् षड्जत्रया मता ॥ २११ ॥
रजनी मूर्छना चात्र मालवाश्रयिणी तु सा ॥

ध्यानम् ।

शोकाभिभूतनयनारुणदीनदृष्टि-
र्नम्राननां धरणिधूसरगात्रयष्टिः ॥

आमुक्तचारुकवरी प्रियदूरवर्ती ।
संकीर्तिता गुणकरी करुणार्द्रांगी ॥ ३१२ ॥

---

## अथ वंगाली ।

**रत्नाकरे—**

धन्यासांशग्रहा भाषा वंगाली भिन्नषड्जगा ।
गापन्यासा दीर्घरिमा धर्मद्रोदीपने भवेत् ॥ ३१३ ॥

**पारिजाते—**

बंगाली रिधहीना स्यान्मतीव्रतरसंयुता ।
नीतीव्रेणापि संयुक्ता सस्वरेत्थितमूर्छना ॥ ३१४ ॥

**दर्पणे—**

बंगाली औडुवा ज्ञेया ग्रहांशन्यासषड्जभाक् ।
रिधहीना च विज्ञेया मूर्छना प्रथमा मता ॥ ३१५ ॥
पूर्णा च मद्वयोपेता कल्लिनाथेन भाषिता ॥

ध्यानम् ।

कक्षानिवेशितकरंडधरस्तपस्वी ।
भास्वत् त्रिशूलपरिमंडितवामहस्तः ॥
भस्मोज्वलो निविडवद्धजटाकलापो ।
बंगाल इत्यभिहितस्तरुणार्कवर्णः ॥ ३१६ ॥

---

## अथ वहुली ।

**मंजर्याम्—**

मत्रिका गनिहीना वा वहुली स्यात् पराह्नतः ॥

**चंद्रोदये—**

मांशग्रहांता गनिवर्जिता वा ।
नवा विगेया वहुली पराह्ने ॥ ३१७ ॥

**नृत्यनिर्णये—**

रामक्रीमेलजाता निगपरिरहिता वारि मध्यांनमध्या ।
[illegible]गी श्यामवर्णा विलुंछितकवरी सन्ध्यकाले मुदंडी ॥



तांबूलास्या प्रगल्भा मरहठवनिता वस्त्रभूषाधिकाढ्या ।
नालायां पीतयुक्ता वहुयतिवहुली शोभते पूर्वयामे ॥ ३१८ ॥

**हृदयप्रकाशे—**

गादिर्मंहीना वहुली षाडवा सा निरूप्यते ॥

**पारिजाते—**

गौरीस्वरा धसाढ्या सा वहुली मध्यमोज्झिता ।
आरोहणे निहीना सा गांधारोद्ग्राहसांशिका ॥ ३१९ ॥

**रागविबोधे—**

अमनिरपराह्नगेया सांशन्यासग्रहा वहुली ॥

---

## अथ शुद्धपंचमः ।

**रत्नाकरे—**

मध्यमापंचमीजातः काकल्यंतरसंयुतः ।
पंचमांशग्रहन्यासो मध्यमाल्पकपंचमः ॥ ३२० ॥
हृष्यकामूर्छनोपेतो गेयः कामादिदैवतः ।
चारुसंचारिवर्णश्च ग्रीष्मेऽह्नः प्रहरेऽग्रिमे ॥ ३२१ ॥
शृंगारहास्ययोः संधावमर्शे प्रयुज्यते ॥

**पारिजाते—**

पंचमो रिपहीनः स्यात् तीव्रगः सादिमूर्छनः ।
मध्यमन्याससंयुक्तो मध्यमांशेन संयुतः ॥ ३२२ ॥

---

## अथ विभासः ।

**मंजर्याम्—**

विभासः सत्रिकः पूर्णः पहीनः शुद्धमादिकः ॥

**चंद्रोदये—**

सांशग्रहांतः सकलस्वरश्च ।
प्रातः प्रयुज्येत विभासकोऽसौ ॥ ३२३ ॥

**नृत्यनिर्णये—**

गौरांगः पंकजाक्षः सुललवरवसनो भालकाश्मीरबिंदु-
र्मंहीलग्नभूप्यकंठश्चतुरवरगिरं कीरमध्यापयन् सः ॥

मेले तातस्य जातस्त्वधिकप्रथमतः [illegible] रागोऽसौ ।
स्वेच्छागामी प्रभाते वदनविनमतां श्रीविभासाख्यरागः॥३२४॥

हृदयप्रकाशे—

औडुवो मनिहीनत्वाद्विभासो गादिरिष्यते ॥

पारिजाते—

मस्तुतीव्रतरः प्रोक्तो गनीतीव्रौ रिधौ मतौ ।
कोमलौ न्यासधोपेतो विभासो गादिमूर्छनः ॥ ३२५ ॥
आरोहे मनिवर्ज्यः स्याद्दर्पांशस्वरसंयुतः ॥

रागविबोधे—

उषासि तु पूर्णोधांशः सांतग्रहः पहीनो वा ॥

---

### अथ भूपाली ।

सत्रिर्मनिभ्यां हीना स्याद्भूपाली प्रातरुत्तमा ॥

रागमालायाम्—

जाता मल्लारमेले निगरतिरहिता मादिमध्यांतरूपा ।
नासाग्रे स्वर्णपुष्पं कमलनयनयोः कज्जलं कंठमालाम् ॥
मौक्तेयं भालमध्ये वरतरतिलकं कंकणे हस्तमूले ।
रक्तं वस्त्रं दधाना त्वनवरतमदा याति भूपालिका सा ॥३२६॥

दर्पणे—

षड्जग्रहांशकन्यासा भूपाली कथिता बुधैः ।
मूर्छना प्रथमा ज्ञेया संपूर्णा शांतिके रसे ॥ ३२७ ॥
कैश्चित्तु रिपहीनेयमौडुवा परिकीर्तिता ॥

ध्यानम् ।

गौरद्युतिः कुंकुमलिप्तदेहा ।
तुंगस्तनी चंद्रमुखी मनोज्ञा ॥
कांतं स्मरंती विहरेणदूना ।
भूपालिकयं रसशांतिगर्भा ॥ ३२८ ॥

---



### अथ कानरः ।

कर्णाटोऽप्युदाह्रियते । मतेऽस्यैव ।

तीव्रगांधारसंपन्ना मध्यमोद्ग्राहतां गता ।
सांशस्वरेण संयुक्ता कर्णाटी सा विराजते ॥ ३२९ ॥
रत्नाकरे तु कर्णाटगौडकः स्मृतः ।
लक्ष्याभावस्तु तत्रापि सोमनाथमते पुनः ।
शुचिता समपानामन्येषां विकृतता मता ॥ ३३० ॥
रागचंद्रोदयेऽप्युक्ता समपानां च नेस्तथा ।
विकल्पः प्रतिपाद्योऽत्र तस्माज्जाता विरोधिता ॥ ३३१ ॥
समयोः शुद्धताभावो रत्नाकरमतेमतः ।
आकाशस्याप्यभावेन शब्दाभावोऽपि संमतः ॥ ३३२ ॥
न्यूनाधिकत्वं यत्र स्यात् श्रुतीनां विकृतिर्मता ।
बाह्यांतरविभेदेन द्विविधा सा सतां मता ॥ ३३३ ॥
यदानिगौ त्रिश्रुतिकौ सोमेशेन विरोधिता ।
ग्रहस्वरविरोधोऽपि त्रिःत्रिर्द्वेत्वेकस्थितावपि ॥ ३३४ ॥
भ्रांतत्वं जायते तस्मिन्नेकस्मिन्नेव कर्तरि ।
कर्णाटी भिन्नमेलत्वाद्भिन्नैव स्यात् ग्रहांशतः ॥ ३३५ ॥
जातिद्वयाभ्यामुत्पन्नो रागोऽसौ गौडकौशिकः ।
जातिद्वयं तु संप्रोक्तं कैशिकी षड्जमध्यमा ॥ ३३६ ॥
स्याद्गौडकैशिकोपांगं कर्णाटगौडकस्ततः ।
कैशिके कैशिकी जातिः कर्णाटे षड्जमध्यमा ॥ ३३७ ॥
इति दुर्गामते प्रोक्तं जातितत्वं विचक्षणैः ॥

रागविबोधे—

कर्णाटगौडमेले शुचिसमपास्तीव्रतमारिमृदुमौ च ।
तीव्रधकैशिकिनौ स्युर्मेलादस्मादिमे रागाः ॥ ३३८ ॥

कर्णाटगौडकोऽड्डाणो नागध्वनिर्विशुद्धवंगालौ ।
वर्णादिनाट इतरे तुरुष्कतोड्यादिकाश्च स्युः ॥ ३३९ ॥

चंद्रोदये—
शुद्धौ समौ पंचमकोऽपि शुद्धः ।
शुद्धो निषादो लघुमध्यमश्च ॥
निगौ यदा त्रिश्रुतिकौ भवेताम् ।
कर्णाटगौडस्य तदैषमेलः ॥ ३४० ॥
कर्णाटगौडोऽपि तुरुष्कतोडी ।
विशुद्धवंगालकनामधेयः ॥
छायादिको नट्टकनामधेयः ।
सामंतकाद्याः प्रभवंत्यमुष्मात् ॥ ३४१ ॥
न्यंशग्रहांतो रिधवर्जितो वा ।
पूर्णस्तु कर्णाट इनास्तशोभी ॥

नृत्यनिर्णये—
शृंगारी पीतवस्त्रः कटकमुकुटसिंहासनच्छत्रयुक्तः ।
गौरांगः श्रीहुसेनी सुहृदभिमतकः पूर्ववागीश्वरीष्टः ॥
त्रिस्त्रिर्द्वैकस्थिताः स्युः स्वररिगधनयः केकिकंठाभकोऽसौ ।
नाद्यंतांशोऽरिधो वा विलसति दिनसान्तेऽपि कर्णाटरागः॥३४२॥

रागतत्वविबोधे—
तीव्रगांधारसंपन्ना मध्यमोद्ग्राहधांतगा ।
सांशस्वरेण संयुक्ता कर्णाटी सा विराजते ॥ ३४३ ॥

मंजर्याम्—
तृतीयगतिगानिधा द्वितीयगतिकोऽपि रिः ।
तदा कर्णाटमेलः स्यात्तत्र संभूतरागकाः ॥ ३४४ ॥
कर्णाटरागः सामंतः सौराष्ट्री छायनाटकः ।
नित्री रिधाभ्यां हीनो वा कर्णाटः सायमिष्टदः ॥ ३४५ ॥



रागकुतूहले—
त्रिनिषादोऽथ संपूर्णो निषादो विकृतो भवेत् ।
मार्जनी मूर्छना ज्ञेया कर्णाटोऽयं सुखप्रदः ॥ ३४६ ॥

---

## ध्यानम् ।

दर्पणे—
कृपाणपाणिर्गजदंतपत्र-
मेकं वहन् दक्षिणकर्णपूरे ॥
संस्तूयमानः सुरचारणौघैः ।
कर्णाटरागः क्षितिपालमूर्तिः ॥ ३४७ ॥

पारिजाते—
अथ कर्णाटगौडः स्यात्द्वितीव्रतरसंयुतः ।
तीव्रगांधारसंयुक्तो गमन्यासांशशोभितः ॥ ३४८ ॥
षड्जादिमूर्छनोपेतः पापन्यासावरोहकः ।
आरोहे धैवतेनाऽपि क्वचिद्वर्ज्यः सतां मतः ॥ ३४९ ॥

## अथ बडहंसः ।

पारिजाते—
बडहंसः सदा गेयः शंकराभरणैः स्वरैः ।
षड्जादिः पंचमांशः स्यान्न्यासोऽपि यत्र सस्वरः ॥ ३५० ॥
अवरोहे गहीनः स्यादारोहे तु धवर्जितः ॥

---

## अथ मालवश्रीः ।

सत्रिधा रिधवर्ज्या च मालश्रीः प्रातरेवहि ॥

रागमालायाम्—
जाता श्रीरागमेले नवगिरिरचिता सादिमध्यांतिका या ।
श्रीखंडापंकचोली कुसुमसुवसनं संदधाना मृगाक्षी ॥

मौढेषद्व्यंग्यवाक्यैः प्रियमुपहसती मालवश्रीः सुतन्वी ।
वक्री क्षेपावकर्णैश्चपलकरतलाद् भ्राम्यती सा सदैव ॥ ३५१ ॥

दर्पणे—

मालवश्रीश्च रागांगा पूर्णा सत्रयभूषिता ।
मूर्छनोत्तरमन्द्रा स्यात् शृङ्गाररसमंडिता ॥ ३५२ ॥

---

**ध्यानम् ।**

रक्तोत्पलं हस्ततलेन युक्तम् ।
विभावयन्ती तनुदेहवल्ली ॥
रसालवृक्षस्य तले विषण्णा ।
स्तोकस्मिता सा किल मालवश्रीः ॥ ३५३ ॥

---

## अथ पटमंजरी ।

संपूर्णा सर्वदा पत्री राजते पटमंजरी ॥

रागमालायाम्—

जाता गौडस्य मेले धरिपरिरहिता त्वादिमध्यांतपा या ।
गौरांगी पीतवस्त्रा मृगमदतिलकं भालमध्ये दधाना ॥
हस्ते वीणैकवाद्या सरसमधुरवाङ्मुक्तकेशी कुरंजी ।
प्रीतालङ्कारयुक्ता प्रथमपदपुरा मंजरी सा सदैव ॥ ३५४ ॥

दर्पणे—

पंचमांशग्रहन्यासा पूर्णा च पटमंजरी ।
हृष्यका मूर्छना ज्ञेया रसिकानां सुखप्रदा ॥ ३५५ ॥

---

**ध्यानम् ।**

वियोगिनी कांतविशीर्णगात्रा ।
स्रजं वहंती वपुषा च शुक्ला ॥
आश्वास्यमाना प्रियया च सख्या ।
सुधूसरांगी पटमंजरीयम् ॥ ३५६ ॥

---



## अथ मेघः ।

सपहीनस्तु मेघः स्याद्धैवतादिकमूर्छना ॥

दर्पणे—

मेघः पूर्णो धत्रयः स्यादुत्तरायतमूर्छना ।
विकृतो धैवतो ज्ञेयः शृंगाररसपूरकः ॥ ३५७ ॥

---

**ध्यानम् ।**

नीलोत्पलाभवपुरिंदुसमानवक्त्रः ।
पीतांबरस्तृषितचातकयाच्यमानः ॥
पीयूषमंदहसितो घनमध्यवर्ती ।
वर्षासु राजति युवा किल मेघरागः ॥ ३५८ ॥

---

## अथ मल्लारः ।

सावेरीमेलजातः सपपरिरहितो धग्रहन्यासकांशः ।
श्यामः पीतांबरो यो मदनपरिचितः कंठमालादिकाढ्यः ॥
विद्युन्मेघातिगर्जैरुदित शिखिगणान्नर्तयन् कीर्णपक्षान् ।
वारामीजन्ममित्रो ह्युपासि मलहरो भाति मल्लाररागः ॥३५९॥

दर्पणे—

मल्लारी सपहीना स्याद्ग्रहांशन्यासधैवता ।
अथवा पौरवी ज्ञेया वर्षासु सुखदा सदा ॥ ३६० ॥

**ध्यानम् ।**

गौरी कृशा कोकिलनादकंठा ।
गीतच्छलेनात्मपतिं स्मरंती ॥
आदाय वीणां मलिना रुदंती ।
मल्लारिका यौवनदूनचित्ता ॥ ३६१ ॥

---

## अथ सौराष्ट्री ।

मंजर्याम्—

सत्रिः सायं च सौराष्ट्री पूर्णा शृंगारवल्लभा ॥

चंद्रोदये—

सांशग्रहा सांतयुता च पूर्णा ।
सौराष्ट्रिका सायमियं विगेया ॥ ३६२ ॥

नृत्यनिर्णये—

सावेरीमेलरक्ता स्वरसकलयुता सत्रिका स्वैरिणी या ।
चित्रं वस्त्रं दधाना कठिनकुचतटे कंचुकीं मेचकीं च ॥
गौरांगी पंकजाक्षी हिमकरवदना दाडिमीबीजदंता ।
सायं शृंगारपूर्णा मदनसहचरी भाति सौराष्ट्रिका सा ॥ ३६३ ॥

हृदयप्रकाशे—

ऋषभादिस्तु सौराष्ट्री कंपांदोलनशोभिता ॥

पारिजाते—

गौरीमेलसमुत्पन्ना धैवतोद्ग्राहशोभिता ।
धन्यासांशापि सौराष्ट्री प्रायशः कंपितस्वरा ॥ ३६४ ॥

---

## अथ सावेरी ।

पारिजाते—

सावेरी तीव्रगांधारा धैवतोद्ग्राहसंभवा ।
मध्यमांशा रिहीना च आरोहे गनिवर्जिता ॥ ३६५ ॥

---

## अथ मालवकौशिकः ।

रत्नाकरे—

कैशिकीजातिजः षड्जग्रहांशांनोऽल्पधैवतः ।
सकाकलीजः षड्जादिमूर्छनारोहिवर्णवान् ॥ ३६६ ॥
प्रसन्नमध्यालंकारो वीरे रौद्रेऽद्भुते रसे ।
विप्रलंभे प्रयोक्तव्यः शिशिरे प्रहरेऽन्तिमे ॥ ३६७ ॥
दिनस्य केशवप्रीत्यै मालवश्रीस्तदुद्भवा ॥



मंजर्याम्—

एकैकगतिकौ रिधौ निगौ मालवकौशिके ॥

दर्पणे—

षड्जग्रहांशकन्यासः संपूर्णः कौशिको मतः ।
मूर्छना प्रथमा ज्ञेया काकलीस्वरसंयुतः ॥ ३६८ ॥

ध्यानम् ।

आरक्तवर्णः कृतरौद्रदृष्टि—
र्वीरः सुधीरेषु कृतप्रहारः ॥
वीरैर्वृतो वैरिकपालमाला ।
माली मतो मालवकौशिकोऽयम् ॥ ३६९ ॥

---

## अथ देवगांधारः ।

चंद्रोदये—

सांशग्रहः सांतयुतश्च पूर्णः
स्याद्देवगांधारक एष नित्यम् ॥ ३७० ॥

नृत्यनिर्णये—

गांधारो देवपूर्वस्त्यनलातिगानिः सत्रिकः पूर्णरूपो ।
नैरंतर्य चकास्ति प्रथमगतिरिधो रत्नसिंहासनस्थः ॥
इंद्राद्यैस्तूयमानो रसपतिरसिकश्चंदनालिप्तदेहः ।
शुभ्रं वस्त्रं दधानः करधृतकुमुदः सर्वभूषाभियुक्तः ॥ ३७१ ॥

हृदयप्रकाशे—

ऋषभादिर्धैवतांशो गांधारः परिकीर्तितः ॥

पारिजाते—

तदा तु देवगांधारः संपूर्णो भैरवो यदा ॥

रागविबोधे—

रिग्रहपांशः सान्तः सदाऽगनिर्देवगांधारः ॥

---

## अथ शंकराभरणः ।

मंजर्याम्—

शंकराभरणः सत्रिः प्रातः संपूर्णमुद्रितः ॥

चंद्रोदये—

षड्जग्रहः सांतयुतोंऽशषड्जः ।
सप्तस्वरो मुद्रितभूषितश्च ॥
सूर्योदयेऽयं समुद्गीयमाने ।
विराजते शंकरभूषणाख्यः ॥ ३७२ ॥

नृत्यनिर्णये—

गौरो रक्तांबरोऽसौ गुरुजलजवरश्रेणिकंठः सुरूपी ।
शृंगारी पद्मपंकैर्विरचिततुतनुर्भालभस्मैकपुंड्रः ॥
नृत्यारंभप्रियोऽसौ मुदितगमकवान् शंकराभूषणाख्यः ।
प्रातः सार्धंतमध्यः प्रचरति मधुमाधव्यशेषस्वरस्थः ॥ ३७३ ॥

हृदयप्रकाशे—

शंकराभरणो गादिर्दोलुकंपमनोहरः ॥

पारिजाते—

शंकराभरणे प्रोक्तौ गनी तीव्रौ च सादिमे ॥

---

## अथ नट्टनारायणः ।

मंजर्याम्—

नट्टनारायणो रागः काकल्यन्तरराजितः ।
संपूर्णः सततं सत्रिर्वर्षाकालेऽतिवल्लभः ॥ ३७४ ॥

चंद्रोदये—

षड्जग्रहः सान्तयुतांशषड्जो ।
युतस्तु पूर्णोऽन्तरकाकलिभ्याम् ॥
विराजमानः सततं निरुक्तो-
ऽसौ नट्टनारायणनामधेयः ॥ ३७५ ॥



नृत्यनिर्णये—

मुग्धस्त्रीसंगतो द्विगतिरिगधनयः पूर्णसाद्यंतमध्यो ।
रुद्राणीवक्त्रजातः शिखिकुलनटिनीनर्तको भूषणाढ्यः ॥
श्यामांगः पीतवस्त्रः करधृतचपलाकांतिखड्गो दयावान् ।
प्रावृट्काले नृणां शं प्रकटयति सदा नट्टनारायणोऽसौ॥३७६॥

हृदयप्रकाशे—

गांधारादिनटः पूर्णः पधसैः कंपितैः कलः ॥

---

## अथ कामोदी ।

रत्नाकरे—

अथ कामोदिका तज्ज्ञा ग्रहांशन्यासधैवता ।
समंद्रा तारगांधारा गुर्वाज्ञायां समस्वरा ॥ ३७७ ॥
कामोदोपांगमाख्यातः कामोदः सिंहली बुधैः ।
कामोदलक्षणोपेता समंद्रा कंप्रधैवता ॥ ३७८ ॥
तारषड्जग्रहन्यासः षड्जमध्यमिकोद्भवः ।
गतारमंद्रः कामोदो धांशः सान्तः समस्वरः ॥ ३७९ ॥
षड्जे षाड्जीभवः षड्जग्रहांशन्याससंयुतः ।
समस्वरोऽन्यः कामोदो मन्द्रगांधारसुंदरः ॥ ३८० ॥

संकीर्णरागाध्याये—

गुंडाक्रिलावलाञ्जातः कामोदः पंचधा भवेत् ।
कामोदः शुद्धकामोदः सामंतस्तिलकस्तथा ॥ ३८१ ॥
पुनः कल्याणकामोद इत्युक्तं भरतादिभिः ।
कामोदो यदि शुद्धेन संयुतः शुद्धपूर्वकः ॥ ३८२ ॥
कामोदेन यदा युक्तः केदारो यदि गीयते ।
तदा भवति सामंतकामोदः प्रीतिवर्धनः ॥ ३८३ ॥
षट्रागो यदा युक्तः कामोदेन ततादिषु ।
तदा तिलककामोदो भवेद्भवविदारकः ॥ ३८४ ॥

यदीयने संमिलतीह गौंड-
खुंदे गुणीनामथवा च वृंदे ॥
तदावनीपालसभासु याति ।
कल्याणकामोद इति प्रसिद्धम् ॥ ३८५ ॥
शुद्धनाटेन कामोदो युक्तः कामोदनाटकः ॥
आडीसिंहलिपूर्वस्तु कामोदः सप्तधा भवेत् ।
सौराष्ट्री कौरवीयोगात् कामोदी समुदीर्यते ॥ ३८६ ॥

मंजर्याम्—
निगावेकैकगतिकौ तृतीयगतिकोऽपि मः ।
एष कामोदमेलः स्यादस्मादन्यतराः परे ॥ ३८७ ॥
सत्रिः संपूर्णकामोदो गायेत्तुरीययामतः ॥

चंद्रोदये—
शुद्धौ पधौ पंचमको लघुश्च ।
शुद्धौ सरी त्रिश्रुतिकौ निगौ च ॥
एवं यदा स्यात् स्वरमेलनं च ।
तदा हि कामोदकमेल एषः ॥ ३८८ ॥
षड्जग्रहांशांतविराजमानः ।
कामोदरागो दिवसान्त्ययामे ॥ ३८९ ॥

नृत्यनिर्णये—
कामोदः कामरूपी धृतकुमुदकरः श्वेतवस्त्रं दधानः ।
कस्तूरी बिंदुभालः कुसुममुकुटः कंठमालादिकाढ्यः ॥
वक्ता सद्व्यंग्यवाक्यं युवजनसहितो वेत्रहस्तः प्रतापी ।
संपूर्णः सत्रिकोऽसौ विधुगतिगानिकश्चापराह्ले चकास्ति॥३९०॥

---

## अथ कल्याणः ।

मंजर्याम्—
मनी तृतीयगतिकौ द्वितीयगतिकोऽपि रिः ।
तृतीयगतिगांधार एष कल्याणमेलकः ॥ ३९१ ॥



सांत्रः संपूर्णः कल्याणः सायंकाले महारुचिः ॥

चंद्रोदये—
शुद्धौ सगौ शुद्धपधौ तथैव ।
लघ्वादिकौ षड्जकपञ्चमौ च ॥
साधारणो गोऽपि यदा भवेत्तु ।
कल्याणकस्याभिहितः स मेलः ॥ ३९२ ॥
सांशग्रहः सान्तयुतश्च पूर्णः ।
कल्याणनामोदयमेति सायम् ॥ ३९३ ॥

नृत्यनिर्णये—
सत्रिः पूर्णो द्विनेत्राग्निपमरिगमनी राजवृंदैः समेतः ।
गौरस्ताम्बूलवक्त्रः सिततरवसनः कंठरत्नैकमालः ॥
कंजाक्षः छत्रमूर्धोभयचमरयुतो रत्नसिंहासनस्थः ।
कल्याणो यम्मनाद्यः परिजनसहितो राजतेऽसौ दिनांते॥३९४॥

हृदयप्रकाशे—
गमध्यमनिषादास्तु यत्र तीव्रतराः कृताः ।
तत्रेमनः पूरियाख्यो जयत्कल्याण एव च ॥ ३९५ ॥
चतुर्थः शुद्धकल्याणः पूर्णस्तत्रेमनो यथा ॥

पारिजाते—
कल्याणमेलसंभूतोऽवरोहे धगवर्जितः ।
षड्जादिमूर्छनोपेतो रागः कल्याणनाटकः ॥ ३९६ ॥

रागविबोधे—
कल्याणस्य तु मेले शुचयः सपधा रिरस्ति तीव्रतरः ।
साधारणश्च मृदुपो मृदुसोस्मिन्नेव इतरे च ॥ ३९७ ॥

---

## अथ शुद्धनाटः ।

मंजर्याम्—
तृतीयगतिकौ शुद्धनाटमेले रिधौ गनी ।
सत्रिकः शुद्धनाटोऽसौ सायं गंभीरनादवान् ॥ ३९८ ॥

चंद्रोदये—

निगौ यदा त्रिश्रुतिकौ भवेताम् ।
लघ्वादिकौ षड्जकमध्यमौ च ॥
तथा विशुद्धाः समपा भवंति ।
विशुद्धनाटाह्वयकस्य मेलः ॥ ३९९ ॥
सांशग्रहान्तः सकलस्वरश्च ।
स्याच्छुद्धनाटो हि चतुर्थयामे ॥ ४०० ॥

नृत्यनिर्णये—

ईशानास्याभिजातस्त्रिगतिगनिरिधः सत्रिपूर्णः सुधीरो ।
रक्ताङ्गः कञ्जनेत्रः सिततरवसनः कंठमालादिकाढ्यः ॥
पाणौ खड्गं प्रतापी स्मितवचनपरः स्निग्धगंभीरनादः ।
संध्यायां राजमार्गे शरदि हयगती राजते शुद्धनाटः ॥४०१॥

संकीर्णरागाध्याये—

पूर्विकामध्यमादिभ्यां युक्तो वागीश्वरो यदि ।
निदानं शुद्धनाटस्य भाष्यते भरतादिभिः ॥ ४०२ ॥

पारिजाते—

रिस्तु तीव्रतरो यस्मिन् गांधारस्तीव्रसंज्ञकः ।
धस्तु तीव्रतरः प्रोक्तोनितीव्रतरनामकः ॥ ४०३ ॥
अवरोहे धगौ न स्तो नाटे रिस्वरमूर्छने ॥

---

## अथ सारंगः ।

मंजर्याम्—

तृतीयगतिमनिधा द्वितीयगतिकोऽपि रिः ।
तुरीयगतिको गश्च मेलः सारङ्गरागकः ॥ ४०४ ॥
सत्रिः सारङ्कः पूर्णः स गायेदपराह्णतः ॥

चंद्रोदये—

शुद्धौ सगौ मध्यमपंचमौ च ।
लघ्वादिकौ षड्जकपंचमौ चेत् ॥



निः कैशिकी चापि यदा तदा स्यात् ।
सारंगकस्याभिहितः स मेलः ॥ ४०५ ॥
सांशग्रहः सांतयुतश्च पूर्णः ।
सारंगकः स्यादपराह्णशोभी ॥ ४०६ ॥

नृत्यनिर्णये—

श्यामांगः पीतवासाः प्रबलतरगदाशंखचक्राब्जहस्तः ।
बाणैः शार्ङ्गेण पूर्णः स्फुरदिषुधिकटिस्तार्क्ष्यगो भूषणाढ्यः ॥
गांधारो वेदगः स्युर्गुणगतिमनिधाः पक्षगो रिस्त्रिषड्जः ।
संपूर्णश्चापराह्णे प्रचरति चतुरो धीरसारंगरागः ॥ ४०७ ॥

हृदयप्रकाशे—

अतितीव्रतरो गाख्यो मधौ तीव्रतरौ कृतौ ।
यत्र निः काकली तत्र सारंगः पटमंजरी ॥ ४०८ ॥
सामंतवडहंसौ च सारंगः सादिमूर्छनः ॥

पारिजाते—

अतितीव्रतमो गः स्यान्मस्तुतीव्रतरो मतः ।
धस्तु तीव्रतरो निः स्यात्तीव्रः षड्जादिमूर्छनः ॥ ४०९ ॥
सन्यासे मध्यमांशे च रागे सारंगसंज्ञके ॥

रागविबोधे—

संपूर्णः सारंगः सांशन्यासग्रहोऽपराह्णरुचिः ॥

---

## अथ हंमीरः ।

मंजर्याम्—

द्वितीयगतिको रिश्च तृतीयगतिकौ निगौ ।
हंमीरमेल एष स्याद्धंमीराद्या ह्यनेकशः ॥ ४१० ॥
सत्रिस्तृतीययामे न हंमीरः पूर्ण ईरितः ॥

चंद्रोदये—

शुद्धौ सगौ मध्यमपंचमौ च ।
शुद्धस्तथा धैवतको यदि स्यात् ॥

लघ्वादिकौ षड्जकमध्यमौ चे-
द्धंमीरनट्टाव्हयकस्य मेलः ॥ ४११ ॥
सांशग्रहांतोऽह्नि तुर्ययामे ।
पूर्णो भवेन्नदहमीरपूर्वः ॥

नृत्यनिर्णये—

संपूर्णो द्विर्गती रिस्त्वनलगतिनिगः सग्रहन्यासकांशः ।
शृंगारी यौवनाढ्यः स्मितपरवदनः कंदुसदंडहस्तः ॥
गौरस्तांबूलवक्त्रः कुसुमशरसुहृद्रक्तवस्त्रः प्रतापी ।
चेतः सीमंतिनीनामनुसरति हमीरादिनाटो हि सायम् ॥४१२॥

हृदयप्रकाशे—

रिगांशो गादितः पूर्णो हंमीरः परिकीर्तितः ॥

रागविबोधे—

गग्रहपांशन्यासो हंमीरोऽल्पनी रात्रौ ॥

---

अथ दीपकः ।

पारिजाते—

दीपको मालवोत्पन्नो मन्यारोहेऽत्र वर्जितौ ।
गांधारोद्ग्राहसंयुक्तो न्यासस्त्वंशो गधौ स्मृतौ ॥ ४१३ ॥

---

अथ वर्णनाटः ।

रागविबोधे—

पूर्णोऽथ वर्णनाटः सांशन्यासग्रहो निशागेयः ॥

---

अथ टक्कः ।

पारिजाते—

रिधौ तु कोमलौ ज्ञेयौ चाभीरी मूर्छनायुते ।
अवरोहे मवर्ज्यं स्याद्रागे टक्काभिधानके ॥ ४१४ ॥



मंजर्याम्—

सायं च सन्निकृष्टकः काकल्यन्तरराजितः ॥

रागमालायाम्—

नृत्यासक्तः सहिष्णुर्नयनगतिगनिः सादिमध्यांतपूर्णो ।
वक्षोहारं सुरत्नं सुकटकमुकुटं चित्रवस्त्रं दधानः ॥
गौरः कामी सुटक्को मदनमदभरश्चन्दनालिप्तदेहः ।
पुष्पाणां कन्दुहस्तो विचरति चतुरः कामदूतः सदासौ ॥४१५॥

अथ सैंधवी ।

चतुर्धा सैंधवी तत्र टक्कभाषा रिपोज्झिता ।
सन्यासांशग्रहा सांद्रा गमकैर्घितस्वरैः ॥ ४१६ ॥
गमतारा षड्जमन्द्रा गेया सर्वरसेष्वसौ ॥

---

अथ द्वितीयसैंधवी ।

सैंधवी पंचमेऽप्यस्ति ग्रहांशन्यासपंचमा ।
रिपापन्याससंयुक्ता रम्या सगमकैः स्वरैः ॥ ४१७ ॥
निरंतरारिबहुला या पूर्वाविनियोगिनी ॥

---

अथ तृतीयसैन्धवी ।

रत्नाकरे—

मालवे कैशिकेऽप्यस्ति सैंधवी मृदुपंचमा ।
समंद्रा निगमैर्मुक्ता षड्जन्यासग्रहांशिका ॥ ४१८ ॥
प्रयोज्या सर्वभावेषु श्रीसोढलसुतोदिता ॥

---

अथ चतुर्थसैंधवी ।

रत्नाकरे—

सैंधवी भिन्नषड्जेऽपि न्यासांशग्रहधैवता ।
उद्दीपने नियोक्तव्या धमन्द्रा रिपवर्जिता ॥ ४१९ ॥

---

अथ पंचमसैंधर्व ।

पारिजाते—

शुद्धमेलोद्भवः पूर्णो धैवतादिकमूर्छनः ।
आरोहे गनिवर्ज्यः स्याद्रागः सैन्धवनामकः ॥ ४२० ॥
आम्रेडितस्वरैर्युक्तः स्फुरितेन च शोभितः ॥

---

अथ षष्ठसैंधवी ।

हृदयप्रकाशे—

शुद्धसप्तस्वरे मेले सैंधवो भैरवी अपि ।
नीलांबरी च तत्र स्यात् सैंधवो धैवतादिकः ॥ ४२१ ॥
आरोहे गनिवर्जो यः स्फुरितेन युतो मुहुः ॥

रागमालायाम्—

भैरव्या मेलजाता स्वरसकलयुता सत्रिका चंद्रवक्त्रा ।
तन्वंगी पद्मनेत्रा विलसितजघना मत्तमातंगयाना ॥
मंदं मंदं वदंती बहुविधगमकैः सैंधवी रक्तवस्त्रा ।
युद्धे योधेश्वराणां विमलतरयशः प्रार्थयंती सदा सा ॥४२२॥

दर्पणे—

षड्जग्रहांशकन्यासा संपूर्णा सैंधवी मता ।
मूर्छनोत्तरमन्द्राद्या काश्चित् पाडविका मता ॥ ४२३ ॥
रिहीना तु भवेन्नित्यं रसे वीरे प्रयुज्यते ॥

---

ध्यानम् ।

त्रिशूलपाणिः शिवभक्तिरक्ता ।
रक्तांबरा धारितबंधुजीवा ॥
प्रचंडकोपा रसवीरयुक्ता ।
सा सैंधवी भैरवरागिणीयम् ॥ ४२४ ॥

---

अथ मध्यमादिः ।

मन्त्रिः प्रातरसौ गेया रिधास्ता मध्यमादिका ॥



दर्पणे—

मध्यमादिश्च रागांगा ग्रहांशन्यासमध्यमा ।
सप्तस्वरैस्तु गातव्या मध्यमादिकमूर्छना ॥ ४२५ ॥
संपूर्णा कथिता तज्ज्ञै रिधहीना कचिन्मता ॥

---

ध्यानम् ।

पत्या सहासं परिरभ्य कामम् ।
संचुंबितास्या कमलायताक्षी ॥
स्वर्णच्छविः कुंकुमलिप्तदेहा ।
सा मध्यमादिः कथिता मुनींद्रैः ॥ ४२६ ॥

---

अथ खंबावती ।

पारिजाते—

खंबावती षड्डीना स्यात् कोमलीकृतधैवता ।
गांधारमूर्छना युक्ता रिणात्यक्तावरोहिणी ॥ ४२७ ॥

दर्पणे—

धैवतांशग्रहन्यासा षाडवा त्यक्तपंचमा ।
खंबावती च विज्ञेया मूर्छना पौरवी मता ॥ ४२८ ॥

---

ध्यानम् ।

खंबावती स्यात् सुखदा रसज्ञा ।
सौन्दर्यलावण्यविभूषितांगी ॥
गानप्रिया कोकिलनादतुल्या ।
प्रियंवदा कौशिकरागिणीयम् ॥ ४२९ ॥

---

अथ ककुभः ।

पारिजाते—

पंचमोद्ग्राहसंपन्ने षड्डीने ककुभे पुनः ।
तीव्रगांधाररादित्यमारोहे चावदन् बुधाः ॥ ४३० ॥

दर्पणे—

धैवतांशग्रहन्यासा संपूर्णा ककुभा मता ।
तृतीयमूर्छनोत्पन्ना शृंगाररसमंडिता ॥ ४३१ ॥

---

### ध्यानम् ।

सुपोषितांगी रतिमंडिताङ्गी ।
चन्द्रानना चम्पकदामयुक्ता ॥
कटाक्षिणी स्यात् परमा विचित्रा ।
दानेन युक्ता ककुभा मनोज्ञा ॥ ४३२ ॥

---

### अथ धन्नाश्रीः ।

रिधाल्पा सत्रिका पूर्णा धन्नासी सा सदा रुचिः ॥

रागमालायाम्—

सर्वांगे भूषणाढ्या धनिरिगविधुरा सत्रिकास्ता रिधाभ्याम् ।
दूर्वाश्यामा विचित्राम्बररचिततनुर्दाडिमीपुष्पहस्ता ॥
नेत्रांतर्वाष्पयुक्ता धवलसहचरी पूर्वजेराकनाम्ना ।
पश्यन्ती गीतवर्त्मोपरि वहुधनदा धन्यधन्नासिका सा ॥४३३॥

स्वमते—

सत्रया रिधहीना स्यादौडुवा च धनाश्रिका ।
मूर्छना प्रथमा ज्ञेया रसे वीरे प्रयुज्यते ॥ ४३४ ॥

दर्पणे—

सत्रया हीनऋषभा धनाश्रीः षाडवा मता ।
मूर्छना प्रथमा ज्ञेया रसे वीरे प्रयुज्यते ॥ ४३५ ॥

---

### ध्यानम् ।

दूर्वादलश्यामतनुर्मनोज्ञा ।
कांतं लिखन्ती विरहेण दूना ॥
श्वेते कपोले नयनेऽश्रुविन्दु—



निस्यन्दनिर्धौतकुचा धनाश्रीः ॥ ४३६ ॥

---

### अथ आसावरी ।

मंजर्याम्—

मत्रिकासावरी पूर्णा सदा गेयातिकारुणा ॥

नृत्यनिर्णये—

गांधारोऽत्राग्रिगः स्यात् प्रथमगतिमनिर्मादिमध्यान्तपूर्णा ।
तन्वङ्गी श्यामवर्णा करधृतमुकुला सर्वशृङ्गारयुक्ता ॥
रम्भायाः काननेषु प्रियविमलयशोऽध्यापयन्ती सुकेशी ।
गंधर्वैः स्तूयमाना प्रियरसकरुणा शश्वदासावरी सा ॥ ४३७ ॥

दर्पणे—

आसावरी गनित्यक्ता धग्रहांशा च औडुवा ।
न्यासस्तु धैवतो ज्ञेयः करुणारसनिर्भरा ॥ ४३८ ॥

अथवा ।

ककुभायाः समुत्पन्ना धान्ता मांशग्रहा मता ।
पंचमेनैव रहिता षाडवा सा निगद्यते ॥ ४३९ ॥

---

### ध्यानम् ।

श्रीखण्डशैलशिखरे शिखिपिच्छवस्त्रा ।
मातङ्गमौक्तिककृतोद्यमहारवल्ली ॥
आकृष्य चन्दनतरोरुरगं वहन्ती ।
सासावरी वलयमुज्वलनीलकान्तिः ॥ ४४० ॥

---

### अथ रामक्री ।

रामक्री सत्रिका पूर्णा सदा गेया विरागिणी ॥

रागमालायाम्—

पूर्णेन्द्वास्या सुमुक्तामणितरलगला नीलवस्त्रं दधाना ।
कूर्पासं रक्तवर्णं करचरणयुगे कङ्कणे नूपुरौ च ॥

रामक्री चंचलाक्षी विमलतरगिरं आलपन्ती विदग्धा ।
शृङ्गाराढ्या विदग्धा स्वनलगतिगनी राजते सर्वदैव ॥४४१॥

दर्पणे—

षड्जग्रहांशकन्यासा पूर्णा रामकरी मता ।
मूर्छना प्रथमा ज्ञेया करुणे सा प्रयुज्यते ॥ ४४२ ॥
रिधत्यक्ताथवा प्रोक्ता कैश्चित् पंचमवर्जिता ।
त्रिविधा सा समुदिष्टा संपूर्णा षाडवौडुवा ॥ ४४३ ॥

---

ध्यानम् ।

हेमप्रभा भासुरभूषणा च ।
नीलं निचोलं वपुषा वहन्ती ॥
कान्ते पदोपान्तमधिष्ठितेऽपि ।
मानोन्नता रामकिरी मतेयम् ॥ ४४४ ॥

अथ देशाख्या ।

मंजर्याम्—

तृतीयगतिकारिगौ निश्च देशाख्यमेलके ।
गत्रिः संपूर्णा देशाक्षी प्रातर्गेया विचक्षणैः ॥ ४४५ ॥

दर्पणे—

देशाख्या षाडवा ज्ञेया गत्रयेण विभूषिता ।
ऋषभेण वियुक्ता सा शार्ङ्गदेवेन कीर्तिता ॥ ४४६ ॥
मूर्छना हारिणाश्चाऽत्र संपूर्णा केचिदूचिरे ॥

---

ध्यानम् ।

वीरे रसे व्यंजितरोमहर्षा ।
निरुध्य संवद्धविशालबाहुः ॥
प्रांशुः प्रचंडः किल गारयष्टिः ।
देशाख्यरागः कथितो मुनींद्रैः ॥ ४४७ ॥

---



अथ अडाना ।

इयं मद्युक्तिः ।

मेघरागेण संयुक्तः कर्णाटो यदि गीयते ।
तदाडानाख्यरागोऽयं भेदः कर्णाटसंभवः ॥ ४४८ ॥

संकीर्णरागाध्याये—

उक्तो मल्लारसंयुक्तस्तत्र निः काकली भवेत् ।
कर्णाटस्य तदाभावो भावभट्टेन कीर्तितः ॥ ४४९ ॥
कर्णाटगो निषादस्तु शुद्धोऽसौ परिकीर्तितः ।
केनचित्त्वेकगतिकस्तदा कैशिकिसंज्ञकः ॥ ४५० ॥
तदा तु मेघ एव स्यात्तत्र मल्हारनामना ।
गौरीमेलसमुत्पन्नो रागतत्त्वेन भाषितः ॥ ४५१ ॥
तृतीयगतिको निस्तु मंजर्यां परिभाषितः ।
अनूपसिंहभूपाग्रे सद्भिः सम्यग्विचारितम् ॥ ४५२ ॥
नृत्यस्य निर्णयेऽप्युक्तस्तीव्र एव न काकली ।
कर्णाटगौडमेलेऽसौ सोमनाथेन भाषितः ॥ ४५३ ॥
पूर्णोऽड्डाणः पाद्यः षांशः सन्यास उल्लसेद्रात्रौ ॥

---

अथ वेलावली ।

पारिजाते—

वेलावल्यां गनी तीव्रौ मूर्छना चाभिरुद्गता ।
आरोहे मनिहीनायामंशः षड्जो बुधैः स्मृतः ॥ ४५४ ॥
अवरोहे गवर्जायां क्वचिद्गांधारमूर्छना ॥

अथवा

धत्रिका रिपहीना वा प्रातर्वेलावलीष्टदा ॥

रागमालायाम्—

धित्तां धित्तां धित्तां तामिति मृदुमुरजं वादयमाना सुतन्वी ।
शृंगाराढ्या सुगौरी कमलवसना चित्त कूर्पासयुक्ता ॥

प्रौढा वेलावली ह्यु सि निजमधुमाधव्यशेषस्वरस्था ।
धाद्यंतांशाऽरिधा वा सरपरदसुता सत्कुडाईसहाया ॥४५५॥

दर्पणे—

धैवतांशग्रहन्यासा पूर्णा वेलावली मता ।
पौरवीमूर्छना ज्ञेया रसे वीरे प्रयुज्यते ॥ ४५६ ॥

---

ध्यानम्।

संकेतदीक्षां दयिताय दत्वा ।
वितन्वती भूपणमंगयष्टौ ॥
मुहुः स्मरंती स्मरमिष्टदेवम् ।
वेलावली नीलसरोजकांतिः ॥ ४५७ ॥

---

अ छायनाटः ।

मंजर्याम्—

छायानाटस्त्रिपः सायं काकल्यंतरराजितः ॥

चंद्रोदये—

षड्जग्रहः सांतयुतश्च सांशोऽ-
तराश्रितः काकलिदीप्यमानः ॥
छायादिमः सायमसौ विगेयो ।
नट्टाव्हयो गानविचक्षणेन ॥ ४५८ ॥

नृत्यनिर्णये—

कर्णाटस्य प्रमेले प्रकटितसुतनुस्त्वादिमध्यांतषड्जः ।
कंठे हारः सरत्नः सितवसनरुचिः पाटलोष्णीषधारी ॥
गौरांगो रक्तनेत्रः सहचरबहुभिर्वीरशृंगारवान् यः ।
छायानाटो दिनान्ते प्रहसति पथिकान् पुष्पसत्कंदुहस्तः ॥४५९॥

पारिजाते—

छायानाटस्तु विज्ञेयः शंकराभरणस्वरैः ।
आरोहे तु निवर्जः स्यादवरोहे गवर्जितः ॥ ४६० ॥



धैवतोद्ग्राहसंयुक्तो रिन्यासोऽनेकमध्यमः ॥

---

अथ गौडसारंगः ।

हृदयप्रकाशे—

गादिर्गपांशः संपूर्णो गौडसारंग इष्यते ॥

---

अथ षड्रागः ।

हृदयप्रकाशे—

पांशन्यासश्चसंपूर्णः षड्रागोगादिमूर्छनः ॥

---

अथ सुहवी ।

मंजर्याम्—

सत्रिः पूर्णा च सुहवी प्रातःकाले सुखप्रदा ॥

हृदयप्रकाशे—

निहीनः षाडवो गादिः सुहवः परिकीर्तितः ॥

नृत्यनिर्णये—

तन्वी श्यामा मृगाक्षी वरकमलमुखी पीतवस्त्रं दधाना ।
प्रौढा सन्मूर्ध्नि वेणीं द्विजवरगमना कंचुकीं कर्बुरां च ॥
वक्त्रेषद्धास्ययुक्ता दशरसरचिता चामरैर्वीज्यमाना ।
सावेरीमेलयुक्ता ह्युपसि तु सुहवी सत्रिका पूर्णरूपा ॥४६१॥

---

अथ जैतश्रीः ।

नृत्यनिर्णये—

नासाग्रे श्रीलवंगं जलजकुटिलकेशी कुंडले श्रोत्रयोर्द्वे ।
चोलीं कौसुंभवस्त्रं शिशुविधुतिलकं चांजनं नेत्रयोश्च ॥
हस्तद्वंद्वे सुकाचप्रवलयनिचयं मूर्ध्निवेणीं दधाना ।
देशीमेले रुचिज्ञा सकलसुजयतःश्रीस्त्रिसा चापराह्णे ॥ ४६२ ॥

हृदयप्रकाशे—

गादिर्जयश्रीः पांशा स्यादारोहे धवर्जिता ॥

---

अथ श्यामः ।

श्यामनाटस्तु केदारमेले गेयो मनीषिभिः ॥

हृदयप्रकाशे—

गादिः पूर्णश्च मन्यासः पमांशः श्यामनाटकः ॥

---

अथ सामंतः ।

मंजर्याम्—

सामंतकस्त्रिसः सायं काकल्यंतरभूषितः ॥

हृदयप्रकाशे—

मनित्यागादौडुवेषु सामन्तः सादिरिष्यते ॥

चंद्रोदये—

षड्जग्रहन्यासयुतश्च पूर्णः ।
षड्जांशयुक्तोऽन्तरकाकलीतः ॥
प्रयुज्यमानः स विभातकाले ।
चकास्ति सामन्तकनामधेयः ॥ ४६३ ॥

नृत्यनिर्णये—

कर्णाटाख्यस्य मेले प्रकटवरतनुः पूर्णरूपस्त्रिषड्जः ।
पद्माभः पद्मनेत्रः श्रवणयुगलतः कुंडले द्वे दधानः ॥
बिभ्रन्मौलौ किरीटं बहुकुसुममयं कञ्जमालां सुवस्त्रम् ।
प्रातःकाले चकास्ति प्रबलगमकवान् प्रौढसामन्तरागः ॥४६४॥

रागविबोधे—

सामन्तः सायाह्ने सांशन्यासग्रहः पूर्णः ॥

अथ देशिकारः ।

मंजर्याम्—

तृतीयगतिनिगमा देशिकारस्य मेलके ।
देशिकारोऽपराह्ने स्यात् सत्रिः संपूर्णको भवेत् ॥ ४६५ ॥



दर्पणे—

देशिकारिस्तु संपूर्णा षड्जन्यासग्रहांशिका ।
मूर्छना प्रथमा ज्ञेया वैराटीमिश्रिता भवेत् ॥ ४६६ ॥

---

ध्यानम् ।

भर्त्रा समं केलिरता सुकेशी ।
सर्वाङ्गपूर्णा कमलायताक्षी ॥
पीनस्तनी रुक्मतनुः सुवेषा ।
चन्द्राननेयं किल देशिकारी ॥ ४६७ ॥

---

अथ इमनः ।

संकीर्णरागाध्याये—

कल्याणेन यदा युक्तः केदारो वा बिलावलः ।
निगदन्तीमनं रागमुदीरन्ति मनीषिणः ॥ ४६८ ॥

---

अथ कुडाई ।

लोकप्रसिद्धसुघराईतीयं प्रातः ॥

---

अथ सुरालयः ।

पारिजाते—

गौरीमेलसमुद्भूतो धैवतस्वरवर्जितः ।
आरोहणे रिहीनः स्यान्निपादादिः सुरालयः ॥ ४६९ ॥

---

अथ अर्जुनः ।

पारिजाते—

गौरीमेलसमुद्भूत आरोहे मनिवर्जितः ।
गधहीनोऽवरोहे स्याद्गादिरर्जुनसंज्ञकः ॥ ४७० ॥

---

## अथ कोकिलः ।

पारिजाते—

कल्याणमेलसंभूतो रागः कोकिलसंज्ञकः ।
सर्वदा मनिहीनः स्याद्गान्धारादिकमूर्छनः ॥ ४७१ ॥

इति श्रीमद्राठोडकुलदिनकरमहाराजाधिराजश्रीकर्णसिंहात्मजजयश्री-
विराजमानचतुःसमुद्रमुद्रावच्छिन्नमेदिनीप्रतिपालनचतुरवदान्यता-
तिशयनिर्जितचिंतामणिस्वप्रतापतापितारिवर्गधर्मावतारश्री-
महाराजाधिराजश्रीमदनूपसिंहप्रमोदितश्रीमहीमहेंद्रमौलि-
मुकुटरत्नकिरणनीराजितचरणकमलश्रीसाहिजहांसभा-
मंडलमंडनसंगीतराजजनार्दनभट्टांगजानुष्टुपचक्रवर्ति-
संगीतराजभावभट्टविरचिते श्रीअनूपसंगीतरत्ना-
करे रागाध्यायः समाप्तः ।

॥ शुभमस्तु ॥

DEPARTMENTAL LIBRARIES * UNIVERSITY OF MADRAS *




## परिशिष्टम् ।

### अनूपसंगीतरत्नाकरग्रंथोक्तविंशतिमेलाः ।

| मेलनामानि | स्वराः | | | | | |
|---|---|---|---|---|---|---|
| १ तोडी | सा | रि | ग | म | प | ध | नि |
| २ गौडी | सा | रि | ग | म | प | ध | नि |
| ३ वराटी | सा | रि | ग | म | प | ध | नि |
| ४ केदारः | सा | रि | ग | म | प | ध | नि |
| ५ शुद्धनाटः | सा | रि | ग | म | प | ध | नि |
| ६ मालकौशिकः | सा | रि | ग | म | प | ध | नि |
| ७ श्रीः | सा | रि | ग | म | प | ध | नि |
| ८ हमीरः | सा | रि | ग | म | प | ध | नि |
| ९ आहेरी | सा | रि | ग | म | प | ध | नि |
| १० कल्याणः | सा | रि | ग | म | प | ध | नि |
| ११ देशाक्षी | सा | रि | ग | म | प | ध | नि |
| १२ देशिकारः | सा | रि | ग | म | प | ध | नि |
| १३ सारंगः | सा | रि | ग | म | प | ध | नि |
| १४ कर्णाटः | सा | रि | ग | म | प | ध | नि |
| १५ कामोदः | सा | रि | ग | म | प | ध | नि |
| १६ हिजेजः | सा | रि | ग | म | प | ध | नि |
| १७ नादरामक्रुतिः | सा | रि | ग | म | प | ध | नि |
| १८ हिंदोलः | सा | रि | ग | म | प | ध | नि |
| १९ मुखारी | सा | रि | ग | म | प | ध | नि |
| २० सोमः | सा | रि | ग | म | प | ध | नि |

टीपः—स्वरांवरील अंक श्रुतींचे आहेत.